Shri Nrisimhapuratirthamahimavarnanam

श्रीनृसिंहपुरतीर्थमहिमावर्णनम्

Document Information

Text title : Shri Nrisimhapuratirtha Mahima Varnanam

File name : nRRisiMhapuratIrthamahimAvarNanam.itx

Category : vishhnu, dashAvatAra, viShNu, padmapurANa, tIrthakShetra

Location : doc_vishhnu

Proofread by : Manoj Kumar Barman

Description/comments : nRRisiMhakosha 3 upAsanA khaNDa uttarArdha. padmapurANe shrInRisiMhapuramAhAt shrIshivapArvatI saMvAde

Latest update : August 11, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 11, 2025

sanskritdocuments.org

श्रीनृसिंहपुरतीर्थमहिमावर्णनम्

दक्षिण प्रयाग माहात्म्य

प्रथमोऽध्यायः

॥ श्रीगणेशाय नमः । श्रीलक्ष्मीनृसिंहाय नमः ॥

लक्ष्मीशोभितवामभागममलं सिंहासने सुन्दरम् ।
सव्ये चक्रधरं च निर्भयकरं वामेन चापं वरम् ॥

सर्पाधीशकृतातपत्रममलं श्रीवत्सवक्षःस्थलम् ।
वन्दे देवमुनीन्द्रवन्दितपदं लक्ष्मीनृसिंहं विभुम् ॥ १॥

श्रुत्वा माहात्म्यमतुलं क्षेत्राणां सरहस्यकम् ।
सर्वार्थैकपदं गुह्यमपृच्छन् मुनयोऽमलाः ॥ २॥

को देवः सर्वदेवानां क्वास्ते कीदृगविधः कथम् ।
पूज्यो मन्त्रोऽस्य कः सूत सर्वं तच्च वदस्व नः ॥ ३॥

सूत उवाच ।
मुनयः साधुपृष्टोऽहं लोकानां हितमीप्सुभिः ।
वक्ष्ये गुह्यं भगवते नत्वा व्यासाय धीमते ॥ ४॥

एकदा रहसि स्थाणुं समाधिनिरतं सती ।
प्रणम्योवाच मधुरं जिज्ञासुर्गुह्यमात्मनि ॥ ५॥

देव्युवाच ।
सर्वज्ञ प्राणनाथेश प्रसादं कुरु शङ्कर ।
किं ध्यायसे चिरं चित्ते ध्येयस्ते कः परात्मनः ॥ ६॥

इत्थं चेत्कृपया तेऽद्य श्रोष्याम्यार्तार्तिनाशन ।
तव प्रसादादहमप्यन्तस्त्वं चितये विभुम् ॥ ७॥

श्रीशिव उवाच ।
शृणु देवि परं गुह्यमनाख्येयमपि क्वचित् ।
वक्ष्ये ध्येयं सदा यत्तदनिर्देश्यं मनोगिराम् ॥ ८॥

यदेकमजरं शान्तं सच्चिदानन्दरूपकम् ।
अनाख्यं नरसिंहेति प्रसिद्धं चिन्तायामि तत् ॥ ९॥

आत्मा यः सर्वभूतानामनादिनिधनोऽव्ययः ।
स्वप्रकाशः सुराधीशैरभिवन्द्यपदाम्बुजः ॥ १०॥

एषः स्वलीलया विश्वं सृजत्यवति हन्त्यजः ।
नानावतारैर्विश्वात्मा क्रीडत्यद्भुतविक्रमः ॥ ११॥

देवानां गुणलिङ्गानामेष कारणमक्षरम् ।
क्षराक्षरविभेदाभ्यामेष सर्वत्र राजते ॥ १२॥

अलिङ्गः सर्वलिङ्गात्मा प्राणलिङ्गो महेश्वरि ।
नृसिंहोऽखण्डमात्मस्थः स्वात्मना चिन्त्यते विभुः ॥ १३॥

देव्युवाच ।
देवेश जगदीशान सर्वज्ञ करुणाकर ।
ज्ञात आत्मा नृसिंहेति प्रसादात्तव शङ्कर ॥ १४॥

कथं ज्ञेयो महामूढैरजितात्मभिरीश्वरः ।
तन्मामाख्याहि यत्रासौ सुखेनावाप्यतेऽखिलैः ॥ १५॥

श्रीशिव उवाच ।
ज्ञेयो भक्त्यैव नृहरिर्लब्ध्वा सत्समागमात् ।
विरक्तः सर्वभोगेषु सर्वात्मा सर्वतोमुखः ॥ १६॥

बाला वा ज्ञानिनः सक्ता विरक्ता वा गुणात्मकाः ।
मुच्येरन् संसृतेर्भक्त्या हरेः सत्सङ्गलब्धया ॥ १७॥

भक्तिस्तदेकनिष्ठा या कायवाङ्मनसा सदा ।
बहुभिर्बहुधा प्रोक्ता सद्यः संसृतिहारिणी ॥ १८॥

अनन्तजन्मसाहस्रैः सञ्चितैः पुण्यराशिभिः ॥

भक्तिस्यान्नृहरौ भव्या सर्वात्मन्यखिलाश्रये ॥ १९॥

नानापातकयुक्तोऽपि मूढोऽप्यविजितेन्द्रियः ।

लीलयाप्नोति कैवल्यं नृहरेर्नामकीर्तनात् ॥ २०॥

दुराराध्यो नृभिर्मूढैरविपक्केन्द्रियैरयम् ।
सुखेनावाप्यते यत्र तद्गुह्यं ब्रवीमि ते ॥ २१॥

पुरा त्रिपुरदाहेन तप्ताशेषतनोर्मम ।
सुधांशुगङ्गासङ्गोऽपि न शान्त्यैयदभूच्छिवे ॥ २२॥

तदा भीमतनोरग्रे सुराः स्थातुमनीश्वराः ।
गत्वा ब्रह्मादयो विष्णुं शरण्यं सुव्यजिज्ञपन् ॥ २३॥

देवा ऊचुः ।
जय शान्त बलाधार विश्वरूप परात्पर ।
विष्णो त्रिपुरसंहर्तुर्दाहं शमय माधव ॥ २४॥

एष वीरो महाभीम उग्रः क्रोधाग्निदीपनः ।
त्रिनेत्रो दाहसन्तप्तो ग्रासं कर्ता घनः स्फुटम् ॥ २५॥

पाहि पाहि त्रिलोकेश हालाहलगिलाननात् ।
अकाण्डे प्रलयो मा भूदच्युताश्रितदेहिनाम् ॥ २६॥

श्रीशिव उवाच ।
इति विक्लवितं तेषां सुराणां वीक्ष्य माधवः ।
प्रहस्य मेघगम्भीरां बभाषे वाचममृताम् ॥ २७॥

श्रीभगवानुवाच ।
अभयं वोऽमरा अस्तु शिवलीलानिवेशतः ।
एतस्मान्नहि साधूनां भीतिर्विश्वात्मरूपिणः ॥ २८॥

भीमोऽयं किल भीमानां मृत्योर्मृत्युञ्जयोऽसौ ।
कालस्यापि महाकालः शिवानां तु शिवं स हि ॥ २९॥

अयं मे हृदयं शम्भुरस्याहं हृदयं परम् ।
इति जानाति तत्त्वेन यः समुच्येत सङ्कटात् ॥ ३०॥

अस्ति तत्र सरित् पुण्या भीमा भीमाङ्गसम्भवा ।
नीराकारं वपुः कृत्वा विधास्ये तत्र सङ्गमम् ॥ ३१॥

अतोऽहं द्रवरूपेण स्वां शक्तिं प्रेरयन् सुराः ।
तमद्यद्रवरूपेण क्रीडन्तं समुपैमि भोः ॥ ३२॥

तत्र यूयं समायात सर्वे सर्वार्थसाधकम् ।
द्रष्टुं भीमाद्रवायोगं लोकान्ना हितमीप्सवः ॥ ३३॥

श्रीशिव उवाच ।
 इत्यादिश्य सुरान् विष्णुस्तत्रैवान्तरधीयत ।
देवः सद्योद्रवाकारं ददृशुर्विस्मितान्तराः ॥ ३४॥

तदैव मे ह्यङ्गभूता नदी सर्वाघहारिणी ।
चचार नीरया भीमा पावनी सर्वदेहिनाम् ॥ ३५॥

देवा उभयतः कूले पश्यन्तो हृष्टमानसाः ।
ययुर्यत्रोभयोः सङ्गः प्रत्यगात्मा हरिः स्थितः ॥ ३६॥

आलोक्यात्मैकसौख्यं श्रीमन्दिरं सुन्दरोत्तमम् ।
प्रणम्य स्तुतिभिः स्तुत्वा दिव्यपुष्पैरवाकिरन् ॥ ३७।
नदीसङ्गमसुस्नाता हतपापतमोभराः ।
नृसिंहदर्शनानन्दनिर्भरास्तेऽभवन्सुराः ॥ ३८॥

तद्देवि परमं क्षेत्रं सिद्धीनां परमायनम् ।
आस्ते यत्रानिशं देवो नृसिंहो भक्तवत्सलः ॥ ३९॥

सुदर्शनमित्यभिहितं क्षेत्रं यद् वेदविद्वरैः ।
तन्नाभिरेष भूगर्भे क्षेत्रराजो विराजते ॥ ४०॥

कलिकल्मषबुद्धीनां महापापकृतामपि ।
दर्शनात्पापराशिघ्नो भजनाद् भुक्तिमुक्तिदः ॥ ४१॥

अत्रैव मृग्यः सर्वात्मा नृसिंहो भवभीरुभिः ।
ध्येयः पूज्यो नमस्योऽयं सर्वार्थैकामरद्रुमः ॥ ४२॥

 @इति श्रीपद्मपुराणे नृसिंहपुरमाहात्म्ये शिवपार्वती संवादे
क्षेत्रोत्पत्तिकथनं नाम प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः

देव्युवाच ।
कासौ शक्तिद्रवीभूता विष्णोस्ते जीवितेश्वर ।
किं नाम कथमाख्याभूद्युदयोरिति शंस मे ॥ १॥

श्रीशिव उवाच ।
या शक्तिर्वैष्णवी देवि द्रवीभूतामलाशिवा ।
सा नीरेति समाख्याता विष्णुतत्त्वैकवादिभिः ॥ २॥

नयनी सर्वभावान्नां नीरा या कथ्यते बुधैः ।
सा नीरा प्रथिता लोके विष्णोः शक्तिः परेश्वरी ॥ ३॥

निःशेषरमणा नीरा चिद्रसानन्दवर्धिनी ।
नीराकारा हरितनुः सेव्या सुरमुनीश्वरैः ॥ ४॥

नानासिद्धिप्रदा पुण्या पुण्यवद्भिरवाप्यते ॥।

तथा भीमेति विख्याता ममशक्तिः शिवाशिवे ॥ ५॥

नाशं नयति पापानि लोकानां या स्वरूपतः ।
भीमस्य मे द्रवतनुर्भीमा लोकेषु पठ्यते ॥ ६॥

इयं हरति लोकानां भीतिं हि भवसिन्धुतः ।
नीराहरिरहं भीमा द्वयोर्योगः सुदुर्लभः ॥ ७॥

सङ्गमोऽयं भुवि ख्यातः प्रयाग इति पावनः ।
अभवद्यजनं यत्र प्रहर्षमगमन् सुराः ॥ ८॥

प्रयागमिति विख्यातं प्रयागात्कोटिपुण्यदम् ।
महर्षिभिः कथितो यस्य महिमा शृणु पार्वति ॥ ९॥

नीराभीमरथीयोगं ये श्रृण्वन्ति विदूरतः ।
ते पापपञ्जरं हित्वा यान्ति विष्णोः परं पदम् ॥ १०॥

किं पुनः शृद्धया नित्यं ये सेवन्ते महाधियः ।
नृसिंहमूर्तिं सन्दृष्ट्वा पुरीं प्राप्ता महोदयाः ॥ ११॥

नीरा नीरेति भीमेति सकृन्नाम जपन्ति ये ।
तेषां नामैव गृणतां यमदूता न गोचराः ॥ १२॥

नीराभीमाम्बुकल्लोलदर्शनोदितचेतसाम् ।
पितरो नरकाद्यान्ति बहिर्विमलिताशयाः ॥ १३॥

इच्छन्ति ते सदात्येतदहो नः कुलदीपकः ।
कश्चिद्गता नरो योगं नीराभीमोद्भवं सुधीः ॥ १४॥

तर्पयिष्यति सुस्नातः श्राद्धं भक्त्या करिष्यति ।
तेन तृप्ता दिवं गत्वा वत्स्यामः शाश्वतीः समाः ॥ १५॥

नीरा भीमरथीयोगं द्रष्टुस्तुष्टाः पितामहाः ।
पुष्टिं ददाति धर्मस्य कष्टान् दूरे दधत्यलम् ॥ १६॥

नीराभीमरथीयोगे स्नातस्याङ्गेषु बिन्दवः ।
तावन्त्यबद्सहस्राणि वसतिः स्मर्यते दिवि ॥ १७॥

यमुद्दिश्याञ्जलिं दत्ते नीराभीमाम्बुसङ्गमे ।
स विमानमुपारुह्य तत्क्षणान्मुच्यते भवात् ॥ १८॥

नीरा भीमरथीयोगे श्राद्धं कृत्वा विचक्षणः ।
आकल्पं नयते तृप्तिं पितॄनेकोत्तरं शतम् ॥ १९॥

ये नानायोनिगतारो ये नानानरकार्दिताः ।
ते मुच्यन्ते क्षणादेव नीराभीमाम्बुतर्पणात् ॥ २०॥

एकं सम्म्भोजयन्जीवं नीराभीमाम्बुसङ्गमे ।
त्रैलोक्यतृप्तिं विधिवन्नयेदाकल्पिकीं नरः ॥ २१॥

यत्र श्रीमान् नरहरिः कैवल्याद्यखिलार्थदः ।
भक्तानुग्रहवानास्ते सरूपोऽरूपवानपि ॥ २२॥

अहो क्षेत्रस्य माहात्म्यं को विजानाति तत्त्वतः ।
सहस्रवदनोऽप्याहो यत्र मूक इव स्थितः ॥ २३॥

एवं नरहरेः साक्षात् सच्चिदानन्दरूपिणः ।
शरीरं क्षेत्ररूपेण प्रतिष्ठामाप्तमत्र हि ॥ २४॥

वालुकाविष्णुरूपेण तरवो विबुधोत्तमाः ।
पक्षिणो मुनयो यत्र मानवाश्चिद्रसात्मकाः ॥ २५॥

सदा पुण्यतमः कालो देशः पुण्यतमः सदा ।
सदा पात्रं पवित्रं हि यत्र देवो नृकेसरी ॥ २६॥

तत्तीर्थं तीर्थतरणं तत्साधनमनुत्तमम् ।
सा सिद्धिर्महती देवि यन्नृसिंहेति कीर्तनम् ॥ २७॥

यस्य लीलातनोः पूर्वं पश्चाद्वापार्श्वं इत्यलम् ।
न शक्यतेऽधिकं कर्तुं परिपूर्णस्य सर्वतः ॥ २८॥

तथापि लीलया तस्य गतीनां नियमः कृतः ।
तेनैव पश्यतां देवि ब्रह्मादीनां पुरः पुरा ॥ २९॥

देवाग्रे मुक्तिरुद्दिष्टामृतानां पृष्ठतोधनम् ।
वामे स्वर्गोऽथ विज्ञानं दक्षिणे परमात्मनः ॥ ३०॥

लब्धा भरतवर्षेऽत्र जन्ममानुषमुत्तमम् ।
न गच्छेन्नृहरेः स्थानं स शोच्योवञ्चितो बत ॥ ३१॥

नृशब्दो जीववाचीह सिंशब्दो बन्धवाचकः ।
नृसिं हन्ता नृसिंहोऽयं जीवबन्धविनाशकः ॥ ३२॥

नृसिंहेणाभितो ज्ञानं भक्तिवैराग्ययोगतः ।
पूर्ण पुरं त्रिलोकस्थैर्नृसिंहपुरमीर्यते ॥ ३३॥

एतद्रहस्यं त्रिषु विष्टपेषु रहस्यमेतत् त्रिषु वैदिकेषु ।
एतद्रहस्यं त्रिगुणेश्वरेषु सङ्गीयते वेदशिरोभिरार्यैः ॥ ३४॥

एतत्त्रयाणां लोकानामुपरिष्टात्पुरास्थितम् ।
मदनुग्रहतो भूमौ ख्यातिमागादनुत्तमाम् ॥ ३५।
ब्रह्मणा तु पुरा प्रोक्तं रहस्यं मे प्रसङ्गतः ।
मया प्रोक्तं नारदाय सुरेभ्यः प्राह यो मुदा ॥ ३६॥

ततो लोकेषु विख्यातमभूत्पापहरं परम् ।
सद्यः सिद्धिकरं देवि महामोक्षैकसाधकम् ॥ ३७॥

विना जपं विना ध्यानं विनार्चेन्द्रियसंयमम् ।
यथात्र भुक्तिर्मुक्तिश्च न तथान्यत्र कुत्रचित् ॥ ३८॥

सन्ति पुर्योवनानीह सरिच्छैलसरांस्यहो ।
न नृसिंहसमो देवो नीराभीमाकृतालयः ॥ ३९॥

एकतः सर्वतीर्थानि नृसिंहपुरमेकतः ।
न भवन्ति समान्यायें भुक्तिमुक्तिमहर्द्धिभिः ॥ ४०॥

कलिकल्मषबुद्धीनां पुरतो मृण्मयं स्फुटम् ।
भविष्यति महाक्षेत्रं सर्वतेजोमयं त्विदम् ॥ ४१॥

न कर्लिन च वा कालो नाधिर्नव्याधिरुल्बणा ।

यत्र जागर्ति चण्डोग्रो मृत्योर्मृत्युर्नृकेसरी ॥ ४२॥

तावत्पातकमातङ्गा गर्जन्ति भुवि निर्भयाः ।
यावद् भीमातटोल्लासि सिंहनाम न वाक्पथे ॥ ४३॥

प्रसङ्गादुपहासाद्वा सङ्केतादुपकीर्तितम् ।
नृसिंहेति सकृन्नाम दहेत् पापौघपञ्जरम् ॥ ४४॥

स यत्र लीलामास्थाय रमतेऽनन्तशक्तिमान् ।
ततः किं परम्म लोके वर्णनीयं फलार्थिभिः ॥ ४५॥

देवि तत्रास्थितो जन्तुर्लीलयाप्नोति यां गतिम् ।
सा योगैरुत यागाद्यैः प्राप्तुमन्यत्र दुर्लभा ॥ ४६॥

अलं योगैरलं यागैलं दीनव्रतादिभिः ।
प्राप्तिर्यदिस्यान्नहरेः पदस्यास्यमहौजसः ॥ ४७॥

श्रीनृसिंहकराग्रेण कल्पान्तनखरोज्ज्वलम् ।
त्रिकोणमस्त्रमेतद्धि राजते परमर्द्धिभिः ॥ ४८॥

तत्तीर्थं वरमद्यापि श्रूयते पुण्यगौरवात् ।
यत्र श्रीसिंहवदनः श्रवणादेव मोक्षदः ॥ ४९॥

नीरामीमासमुत्पत्तिमाहात्म्यं नृहरेः पुरम् ।
श्रृणुयात्कीर्तयेद्भक्त्या यः स पापैः प्रमुच्यते ॥ ५०॥

@इति श्रीपद्मपुराणे नृसिंहपुरमाहात्म्ये श्रीशिवपार्वतीसंवादे
नृसिंहपुरक्षेत्रमहिमावर्णनं नाम द्वितीयोऽध्यायः ।

तृतीयोऽध्यायः

सूत उवाच ।
नृसिंहपुरमाहात्म्यं श्रुत्वा देवी मुदान्विता ।
पुनः पप्रच्छ भावेन प्रणम्य गिरिशं सती ॥ १॥

देव्युवाच ।
साधु साधु महापुण्यं रहस्यं कथितं त्वया ।
माहात्म्यं पुरवर्यस्य महापापौघनाशनम् ॥ २॥

कियत्प्रमाणं तत्क्षेत्रं किमारभ्य भुवं गतम् ।

तीर्थान्यत्र कति स्वामिन् सर्वं वर्णय विस्तरात् ॥ ३॥

श्रीशिव उवाच ।
शिवे साधु महाक्षेत्रमेतद् बुद्धेरगोचरम् ।
प्रमाणं यावदाकाशं यावच्चित्तस्य विस्तरः ॥ ४॥

एतद्गौणमपि प्रायो मुख्यं केचिद् हि मन्वते ।
अन्यानि क्षेत्रजातानि क्षेत्रं प्राहुर्विपश्चितः ॥ ५॥

लोकानां मूढदृष्टीनां तत्त्वज्ञाने कुचेतसाम् ।
संसाराब्धिप्लवो दृष्टः क्षेत्रराजोऽयमुत्तमः ॥ ६॥

पञ्चक्रोशं हरिपुरं नगरं योजनत्रयम् ।
देवालयं योजनार्थं प्रमाणमिति विश्रुतम् ॥ ७॥

गणराजोम्बिका दुर्गा शारदा बहिरास्थिताः ।
क्षेत्रस्यास्य महाविघ्नान् संहर्तुं दिक्षु वै क्रमात् ॥ ८॥

तदन्तरायुधान्यस्य दक्षिणोत्तरयोः पृथक् ।
रक्षन्ति सकलापघ्यो महाक्षेत्रमिदं भिये ॥ ९॥

देवालये सुरगणा मुनयः सिद्धचारणाः ।
गन्धर्वाप्सरसो नागा यक्षरक्षांसि किन्नराः ॥ १०॥

वसवोऽष्टौ तथा रुद्रा आदित्याः समरुद्गणाः ।
अहं ब्रह्मा विश्वरूपो गणेशः सनकादयः ॥ ११॥

देवा अन्ये च शतशो रक्षति क्षेत्रमुत्तमम् ।
निधिं यथा भूतगणा उग्रवेषाः समन्ततः ॥ १२॥

एतत्पुरा महाकल्पे ब्रह्मणोम्बुजशायिनः ।
अनुग्रहायाविरभूद् दिव्यं भुवि महाद्भुतम् ॥ १३॥

देव्युवाच ।
भगवन्ननुग्रहः कृतो ब्रह्मणो हरिणा कथम् ।
कथं भुवि गतं तच्च सर्वं विस्तरतो वद ॥ १४॥

श्रीशिव उवाच ।
कल्पान्ते योगशय्याया उत्थिते कमलापतौ ।
सिसृक्षासीत्पुरा तत्र पद्मनाभेरुदाययौ ॥ १५॥

तन्मध्ये रजसा युक्तो ब्रह्माभूद् विश्वसृक्पतिः ।
तस्य स्वमूलपद्मस्य मूलेक्षासीदये सति ॥ १६॥

स वर्षाणां शतं पश्यन् नालरन्ध्रेण तत्पदम् ।
नाविन्ददथ सङ्क्लिष्टो भूत्वा पद्मोपरि स्थितः ॥ १७॥

तत्र श्रीनृहरिः प्रेम्णा व्योमात्मा गूढमाहतम् ।
तपस्तपेति तं मत्वानुग्रहं स तताप ह ॥ १८॥

स वर्षशतमेकाग्रसमाधौ परितिष्ठतः ।
तस्येदं दर्शयामास रूपं नारायणो हरिः ॥ १९॥

सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।
सहस्रबाहुर्विश्वात्मा लोकान्व्याप्य व्यवस्थितः ॥ २०॥

दिव्याभरणशोभाढ्यो दिव्यगन्धानुलेपनः ।
दिव्यमाल्याम्बरधरो दिव्यायुधविभूषितः ॥ २१॥

सर्वलक्षणलक्षण्यः सर्वसौभाग्यशेवधिः ।
सर्वमन्त्रमयोदेवः प्राहालं तपसा विधे ॥ २२॥

इति पीयूषमधुरां निपीयाब्जभवोगिरम् ।
स सञ्जीव इव प्रेम्णा प्रफुल्लवदनाम्बुजः ॥ २३॥

प्रणम्य देवदेवेशं प्रणतार्तिहरं हरिम् ।
अस्तौषीदेकमनसा हरिदर्शनलब्धधीः ॥ २४॥

ब्रह्मोवाच ।
नमोऽस्तु लीलामयविग्रहाय स्वरूपदृष्ट्याहतसद्भ्रमाय ।
नमः परानन्दपरालयाय स्वभावसम्पत्तिमहोदयाय ॥ २५॥

नमो गुणानां पतये महिम्ने विकारधाम्नेऽखिलकारणाय ।
नमो जगद्भासयते गरिम्णे सते चिदात्माकृतये गुणाय ॥ २६॥

त्वमादिरस्यासि निदानमध्यं विश्वाकृतिस्त्वं प्रलयो विभुस्त्वम् ।
त्वं सर्वयोनिस्त्वमसर्वयोनिस्त्वं सर्वशोऽसित्वमसर्वशश्च ॥ २७॥

नमः पुरस्तादथ पार्श्वयोस्ते पश्चान्नमोन्तर्बहिरीश्वराय ।
पूर्णाद्वितीयाय नमः पराय अणीयसेऽनन्तचिदे परस्मै ॥ २८॥

वनेः स्फुलिङ्गा इव वारिम्भङ्गाः सिन्धोरिवौघा इव वासनानाम् ।

भवन्ति तिष्ठन्ति वियन्ति यत्र ब्रह्माण्डसङ्घास्तमजं प्रपद्ये ॥ २९॥

यदीक्षया जनिरस्याप्रमेयो विभुर्नृसिंहो वरदो ममास्तु ।
योनाहमस्मिन् विविधेऽत्रसङ्गे सम्प्रेरितः कालविनष्टदृष्टिः ॥ ३०॥

यस्यादेशात् सर्गकर्मप्रवृत्तो भूत्वाप्यहं कालसम्मूढचेताः ।
स पुण्यवाचा मम सृष्टिमेतामलङ्करोतु प्रभविष्णुरीशः ॥ ३१॥

इहैव लोको ह्यसमीक्ष्य बद्धो मायागुणैः कामयते नु कामान् ।
यच्छन्नमुष्मै य इहाप्रमेयो हरत्यनन्तो निमिषं प्रसीद ॥ ३२॥

नमो नियन्त्रे नियमालयाय नमो जगन्मोहतमोरुणाय ।
नमो नृसिंहाय विलासधाम्ने नमः शिवायामितविक्रमाय ॥ ३३॥

नमो मनोदूरचराय वाचां बाचामनिर्देश्यपदाय भूम्ने ।
नमः स्वभासाखिलभासकाय प्रमाणमात्रे जगदीश्वराय ॥ ३४॥

श्रीशिव उवाच ।
इति स्तुत्वा यथाप्रज्ञमजमात्मानमीश्वरम् ।
तूष्णीं बभूव विश्रान्त इव स्वे मनसीश्वरः ॥ ३५॥

ततः प्रसादमधुरस्मितपीयूषसन्मुखः ।
प्राह देवेश्वरो वाचा जीवयन्निगमानिव ॥ ३६॥

श्रीभगवानुवाच ।
अब्जयोने प्रसन्नोऽहं वरं वरय सुव्रत ।
आदेशान्मम यत्पूर्वं तपस्तप्तं त्वया खलु ॥ ३७॥

सर्वत्र मद्भावनया दूरयस्व रजो महत् ।
अहमेवाखिलं वस्तु सदसत्परमव्ययम् ॥ ३८॥

भूतं भव्यं भवच्चान्यन्नमत्तोऽस्ति चराचरम् ।
मय्येव मन आधत्स्व रजोगुणनिवृत्तये ॥ ३९॥

यदात्मनि न निर्भातमाभाति च निरर्थकम् ।
तत्तम बिम्बवन्मायां जानीहि हीनदर्शनम् ॥ ४०॥

मदात्मा मद्विकारस्त्वं मत्कर्मा मदवस्थितिः ।
मयात्मना सृजन् सर्वमपि नो लिप्यसे गुणैः ॥ ४१॥

सिद्धं सर्वेश्वर त्वत्तः सर्वं मे यदभीप्सितम् ।

कामद्रुममवाप्याहो कः शोचेत हि पण्डितः ॥ ४२॥

तथापि याचे ह भवतः शासनेन महेश्वर ।
स्थातव्यं भुवि देवेश रूपेणानेन सर्वग ॥ ४३॥

ये मूढा ये दुराचारा ये च कामहता नराः ।
तेषां मदान्धमनसां प्रसादं कर्तुमर्हसि ॥ ४४॥

श्रीभगवानुवाच ।
विधेद्यारभ्य तिष्ठामि भुवि लोकहितङ्करः ।
श्रवणाद्दर्शनाध्यानात्कायवाङ्मनसाघहृत् ॥ ४५।
जम्बुद्वीपे भारतेऽहं गोदाकृष्णान्तरावनौ ।
तिष्ठामि शम्भुना सार्धमेकरूपः सतां गतिः ॥ ४६॥

नृसिंहनामा जीवानां बन्धहा वरदेश्वर ।
स्थास्यामि दृश्यादृश्यात्मा नानाशक्तिभिरादरात् ॥ ४७॥

तवानुग्रहकामाय लोकानां हितमीप्सया ।
स्थितोऽपि पापैर्दुर्लभ्यः प्रायशोऽहं प्रजाधिप ॥ ४८॥

तथापि पूर्वदत्तं ते वचनं कर्तुमिच्छया ।
नीराभीमाम्बुकल्लोले विहरामि सुरेश्वर ॥ ४९॥

ततः प्रह्लादनामाग्रे दैत्यपुत्रो भविष्यति ।
स नारद वचसा करिष्यति तपो महत् ॥ ५०।
तत्तपस्तुष्ट आराद्धि नीराभीमाम्बुसङ्गमात् ।
स्थास्ये प्रत्यङ्मुखो ब्रह्मन् द्विभुजः सिद्धिभूषणः ॥ ५१॥

ततो मां भुवि सल्लोका भजिष्यन्ति सुसिद्धये ।
अष्टाक्षरमनुप्रोक्तं प्रजापनवराभयम् ॥ ५२॥

सर्वेषामिहभूतानां भजतां मामनारतम् ।
ददामि विपुलान् भोगानन्ते कैवल्यमद्भुतम् ॥ ५३॥

श्रीशिव उवाच ।
इत्युक्त्वा भगवान् विष्णुः प्रणतो ब्रह्मणार्चितः ।
अन्तर्धायात्मनोरूपं भुवि प्रादुर्भवं गतः ॥ ५४॥

इमं प्रादुर्भवाध्यायं यः श्रोष्यति पठिष्यति ।

सर्वान् कामानवाप्नोति प्रसादान्नृहरेहरेस्तु सः ॥ ५५॥

@इति श्रीपद्मपुराणे नृसिंहपुरमाहात्म्ये श्रीशिवपार्वतीसंवादे
श्रीनृसिंहप्रादुर्भावो नाम तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः

श्रीदेव्युवाच ।
प्रह्लादो दैत्यपुत्रो यो भविष्यति महातपाः ।
तदाख्यानं कथं देव देवाविर्भावकारणम् ॥ १॥

दैत्या वै राजसाः क्रूराः स्तब्धाः पण्डितमानिनः ।
तदुद्भवेषूपशमस्तापसानां सुदुर्लभः ॥ २॥

श्रीशिव उवाच ।
पुरा वैकुण्ठनाथस्य दूतौ देववर्चितौ ।
जयोऽथ विजयो नाम्ना प्रसिद्धौ द्वारपालकौ ॥ ३॥

तयोः कदाचित्कुपिता ब्रह्मणो मानसाः सुताः ।
शापं ददुर्निषिद्धा ये हरिसन्दर्शनोत्सुकाः ॥ ४॥

यातं युवां महाघोरां चासुरीं योनिमुल्बणाम् ।
त्रिभिर्जन्मभिरायातं पुनः पदमनामयम् ॥ ५।
जनिं प्राप्य दितिसुतौ हिरण्यकशिपुस्तथा ।
हिरण्याक्ष इति ख्यातौ भवितारौ सुदुर्जयौ ॥ ६॥

हिरण्यकशिपुः कर्ता राज्यं त्रैलोक्यवन्दितः ।
हर्ता क्षोणीं हिरण्याक्षो वराहेण हतो रणे ॥ ७॥

हिरण्यकशिपुः स्वस्य भ्रातुः प्रेतस्य दुःखतः ।
तप्ता तपो बहुसमा विसृज्य सकलां श्रियम् ॥ ८॥

तावदिन्द्रोऽमरैः सार्धं प्रभज्य तत्पुरीं खलु ।
कयाधुं तस्य दयितामपहर्ता पुरीं हटात् ॥ ९॥

प्रजावती नारदेन दृष्टा पथि शुचातुरा ।
नीयमाना सुरेन्द्रेण मुनिना याचिता भवेत् ॥ १०॥

तस्यै सगर्भमुद्दिश्य ज्ञानं गुह्यं सधर्मकम् ।

ददाति सादरात्सूनोरुदयाय महौजसाः ॥ ११॥

कालं नेष्यत्याश्रमेऽस्य काङ्क्षन्ती दितिजागमे ।
भजन्ती मुनिशार्दूलं नारदं पितृवत्सती ॥ १२॥

विधेर्वरात्स कालेन आयास्यति पुरीं पुनः ।
प्रसोष्यति कयाधुर्वै तनुजांश्चतुरः प्रिये ॥ १३॥

प्रह्लादो भगवद्दासोऽनुगृहीतो महर्षिणा ।
भविष्यति सदाकाले करिष्यति तपो महत् ॥ १४॥

नीराभीमाम्बुसंयोगे स्तुवानो मे पुरोऽर्भकः ।
आयास्यति कृपाभारादुपदिष्टो महर्षिणा ॥ १५॥

प्रणतं सगुणं बालं प्रह्लादं सुन्दरोत्तमम् ।
अनुग्रहीष्यति गुह्येन मन्त्रेण मुनिसत्तमः ॥ १६॥

करिष्यति तदा बालो नृहरेः स्तवनमिच्छया ।
प्रतिमां सैकतीं तस्य द्विभुजां सुन्दरां प्रिये ॥ १७॥

तुष्टः सिंहाननो देवः प्रतिमायां विशन् हरिः ।
आविर्भविष्यति हि मा भैषीर्बालेति संवदन् ॥ १८॥

स ईशाश्वासितः प्रेम्णा गद्गदस्वरसङ्कुलः ।
अश्रुभिर्मीलिताक्षोऽमुं सन्नस्यति भावतः ॥ १९॥

उत्थाप्यालिङ्ग्य विश्वेशः कृपां तस्मिन्करिष्यति ।
स स्वामिगात्रस्पर्शेण पूतो ज्ञानमवाप्स्यति ॥ २०॥

पूजयित्वा जगन्नाथं नृसिंहं वरदेश्वरम् ।
स्तोष्यति स्वस्थभावेन परमानन्द सुन्दरम् ॥ २१॥

प्रह्लाद उवाच ।
जयदेव जगन्नाथ सर्वजीवनशेवधे ।
सुधालोकलवामोद जीविताखिलवृत्तिद ॥ २२॥

जय मायामहोर्मीणामाकरानन्दसागर ।
ब्रह्माण्डबुद्बुदोन्नद्धविलासाकुलरोधस ॥ २३॥

जयानन्त महाभाग्य मोक्षलक्ष्मीं महीं कुरु ।
ब्रह्मभावफलोद्यानचिदेकामरपादप ॥ २४॥

जय काममहावल्लीसङ्करोपितसत्फलैः ।
विस्तृतावनिसौराज्य सदेकानन्दगह्वर ॥ २५॥

जय जीवमहामोहबन्धध्वंसनपण्डित ।
जय देव वरेशान वरदाधीश सत्पते ॥ २६॥

जय मोहातिमायेश कालकाल नृसिंह भोः ।
जय ग्रस्तमहामृत्यो प्रसीद करुणानिधे ॥ २७॥

त्वमेकः स्तुतिरीशानः स्तोता स्तुत्यस्त्वमीश्वरः ।
न जाने त्वत्परं देवं भूमौ सदसदात्मकम् ॥ २८॥

श्रीभगवानुवाच ।
प्रह्लादार्भकवरश्रेष्ठ वरदोऽहं वरं वृणु ।
नमामालोक्य भूमानं कोऽपि शोचितुमर्हति ॥ २९।
प्रह्लाद उवाच ।
को वरस्ते वरेशान दर्शनादधिको मतः ।
यन्नामश्रवणात्पूतः सद्यः स्याद् गोवधादपि ॥ ३०॥

तथापि याचे सन्दिष्टः प्रभुणा किङ्करानुगः ।
स्वामिन्ननेन रूपेण विशास्यां प्रतिमां भुवि ॥ ३१॥

ये भजन्ति समर्चन्ति मानवाः प्रणमन्ति ये ।
तेषामभीष्टकामानां पूरको भव सर्वदा ॥ ३२॥

एष एव वरो देव नान्यं त्वत्तो वरं वृणे ।
मन्मनस्त्वत्पदद्वन्द्वे निर्द्वन्द्वं स्थिरमस्तु भोः ॥ ३३॥

श्रीशिव उवाच ।
एवं सन्दृश्य भगवांस्तुष्टो वक्ष्यति बालकम् ।
प्रफुल्लवदनाम्भोजस्फुरत्स्मितकलाधरम् ॥ ३४॥

श्रीभगवानुवाच ।
तथास्तु प्रतिमायां ते स्थास्याम्यत्र निरन्तरम् ।
पालयिष्यामि सुजन्दर्शनादेव स्वरैः ॥ ३५॥

ये मां द्विभुजमीशानं त्वदर्चाकृतविष्टरम् ।
भजन्ति भक्त्या परया ते वै यान्ति परां गतिम् ॥ ३६॥

मामुद्दिश्य सुदूरस्थो ददानो दानमर्थिनाम् ।
पूजां दधाति तस्याहं कामान् सम्पूरयेऽखिलान् ॥ ३७॥

किं पुनः श्रद्धया धीमान् महायात्रां करोति यः ।
तस्य पुण्यकृतः पारो नास्ति पुण्यस्य कर्हिचित् ॥ ३८॥

नृसिंहदर्शनं लप्स्ये यस्य बुद्धिरिति स्फुरेत् ।
स सर्वपापविनिर्मुक्तो भवेदर्कोदये तमः ॥ ३९॥

ततः प्रयातस्य गृहात्पूजयित्वेष्टदेवताः ।
देवताः सम्प्रसीदन्ति ददते विपुलान्वरान् ॥ ४०॥

ततोऽध्वनि समायातः स्तुवतो नामरभिर्हरिम् ।
पदेपदेऽश्वमेधस्य फलं तस्य विनिश्चितम् ॥ ४१॥

महापुण्यभरैः प्राप्य क्षेत्रं मद्वल्लभं नरः ।
मानुषीतनुरूपोऽपि भवेन्मद्रूपसाम्यभाक् ॥ ४२॥

मामालोक्य सकृन्मर्त्यो वैकुण्ठे लभते स्थितिम् ।
मां भजन्स्वपुष्यन्ते सायुज्यं लभते खलु ॥ ४३॥

ये मामनिशमीशानं भजते श्रद्धयान्विताः ।
ते देवा मर्त्यरूपेण ज्ञेयाः सर्वे चतुर्भुजाः ॥ ४४॥

अज्ञो वा ज्ञानवान्बालो वृद्धोनीचोथचोत्तमः ।
नृसिंह मां भजन्मुक्ताः सद्यो याति गतिं सताम् ॥ ४५॥

सकृत्प्रदक्षिणीकृत्य कृतास्याद् भूप्रदक्षिणा ।
सकृन्नत्वा दण्डवन्मां भवेद्विबुधसत्तनुः ॥ ४६॥

दर्शनात्पुण्यरूपोऽसौ पारमेष्ठयं पदं व्रजेत् ।
पूजनान्ममसारूप्यं भजनान्मयि संस्थितिम् ॥ ४७॥

त्वमप्यसुरराजेन वत्स द्रोहिष्यसे यदा ।
आप्विमुक्तये बाल तदा मत्स्मरणं कुरु ॥ ४८॥

यातनाः प्रशमं सर्वा यास्यन्ति मदनुग्रहात् ।
पितापि मम संस्पर्शात्पूतो यास्यति मत्पदम् ॥ ४९॥

यदायदा ध्यायसि मामधीशं चेतः समाधाय मदङ्घ्रिपद्मे ।

तदातदा तत्र हि तत्र सिद्धस्तिष्ठामि तेऽग्रे स्मृतिमात्रतोहि ॥ ५०॥

एतावदभयं दत्वा चिन्मयो दृश्यरूपधृक् ।
वालुकाप्रतिमायां वै तिष्ठेत्तत्र निरन्तरम् ॥ ५१॥

प्रह्लादोऽपितमीशानं त्रिः परिक्रम्य सन्नतः ।
पूर्णार्थः पुरमागत्य भविष्यति जडाङ्गवत् ॥ ५२॥

तं विरुध्य पिता तस्य क्षयमेष्यति तत्क्षणात् ।
उदीर्णवक्षःस्थलो भूत्वा नखरैर्नृहरेस्तदा ॥ ५३।
इति ते कथितं देवि प्रह्लादाख्यानमुत्तमम् ।
पठतां शृण्वतां नृणां पापघ्नं मङ्गलार्थदम् ॥ ५४॥

य एतत् पठति प्राज्ञः शृणोत्यवहितो नरः ।
स प्रसादं हरेर्याति प्रियः प्रह्लादवद्भवेत् ॥ ५५॥

प्रह्लादेन कृतं स्तोत्रं यः पठेत्प्रातरन्वहम् ।
तस्य मन्त्रभवा सिद्धिर्मासेनस्यात्परार्थदा ॥ ५६॥

अन्नं यशः सुतान् कामान् पुण्यमोक्षं सनातनम् ।
प्रभावादस्य स्तोत्रस्य मर्त्यो वै प्राप्नुयात् सदा ॥ ५७॥

इति ते कथितो देवि क्षेत्राविर्भावको भुवि ।
अधुना तीर्थमाहात्म्यं शृणु सिद्धिप्रदोत्तमम् ॥ ५८॥

@इति श्रीपद्मपुराणे नृसिंहपुरमाहात्म्ये श्रीशिवपार्वतीसंवादे
क्षेत्राविर्भावकोनाम चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः

श्रीशिव उवाच ।
देवस्य वामभागेऽस्ति लक्ष्मीतीर्थमनुत्तमम् ।
तस्य प्रमाणं व्यायामः शतचापमिदं विदुः ॥ १॥

पुरा लक्ष्म्यातपस्तप्तं तत्र दिव्यं समाशतम् ।
चाञ्चल्यदोषशान्त्यर्थं प्रसादान्नृहरेः प्रभोः ॥ २॥

ततः प्रसन्नो भगवांस्तस्यै वरमदाच्छुभम् ।
प्रिये खिन्नासि तपसा दुश्चरेणापि योगिभिः ॥ ३॥

तवाभीष्टं ददाम्याशु वरं वरय मङ्गले ।
चाञ्चल्यमयि ते नास्तु स्वस्था तिष्ठा वक्षसि ॥ ४॥

भार्गवे वासरे ये त्वामत्रस्तोष्यन्ति भक्तितः ।
देवीसूक्तेन वा मन्त्रैः पौराणैरागमोद्भवैः ॥ ५॥

तेषां हराम्यहं शश्वद्विपदः सम्पदोऽर्पये ।
मोक्षलक्ष्म्या विशेषेण पात्रं ते स्युर्न संशयः ॥ ६॥

इत्युक्त्वालिङ्ग्य कमलां तूष्णीमासीच्छुचिस्मितः ।
प्रतीक्षमाणः पद्मास्य प्रीतोऽभूद्वचसा तदा ॥ ७॥

लक्ष्मी उवाच ।
सर्वज्ञ करुणाम्भोधे नाथ सिंहाननाच्युत ।
वरदश्रेष्ठ यदि प्रीतो देहि मे यदभीप्सितम् ॥ ८॥

अस्मिंस्तीर्थे कृतस्नानदानतर्पणभोजनाः ।
तव मन्त्रजपासक्ताः सर्वे सन्तु महोदयाः ॥ ९॥

नित्यं त्वदङ्करमणीं ये स्मरन्ति महालसाम् ।
तेषामनन्यमनसां मुक्तिः करगता भवेत् ॥ १०॥

भूयादत्र महाँल्लाभः सर्वदा सिद्धिसम्भवः ।
योगमन्त्रतपोदानव्रतानां त्वत्प्रसादतः ॥ ११॥

श्रीभगवानुवाच ।
एवमस्तु विशालाक्षि तीर्थेऽस्मिन्सर्वदा प्रिये ।
सदा स्थास्यामि भवतीमङ्केकृत्वा वरानने ॥ १२॥

सिद्धयः सन्तु योगाद्या मोक्षसिद्धिरपि प्रिये ।
मुक्तितीर्थं सिद्धितीर्थं लक्ष्मीतीर्थं मनोहरम् ॥ १३॥

नृसिंहतीर्थमित्याख्या भूयादस्य वरानने ।
अष्टपीठानि परितो भविष्यन्त्यस्य गुप्तये ॥ १४॥

पूर्वे कोल्हापुरं नाम कामाक्षं नाम दक्षिणे ।
पश्चिमे विरजं पीठं कामरूपं तथोत्तरे ॥ १५॥

त्रिकूटं हिङ्गुलासिन्धुजालन्दरमितिस्फुटम् ।
कोणेषु तानि स्थास्यन्ति नानासिद्धिप्रदान्यलम् ॥ १६॥

कलौ कलुषबुद्धीनां नूनं गूढं भविष्यति ।
लक्ष्मीतीर्थस्यमहिमा न केनापि क्षमोऽवितुम् ॥ १७॥

अत्राहं त्वं सदा गूढं तिष्ठामो योगसिद्धये ।
लक्ष्मीनृसिंहमनुना पूजितौ संस्तुतौ नतौ ॥ १८॥

श्रीशिव उवाच ।
 इत्युक्त्वा सरमो देवस्तत्रैवान्तरधीयत ।
तदारभ्याभवत्तीर्थं सर्वेषां सर्वसिद्धिदम् ॥ १९॥

कालेन नीरा संयाता तस्योपरि शुचिस्मिते ।
ततो नारायणं नाम तीर्थं विद्वद्भिरुच्यते ॥ २०।
कदाचिदत्र संयातो वणिक्कश्चिद्धनी महान् ।
स्नात्वा विचारयामास कुतो मे सम्पदीदृशी ॥ २१॥

न मयाराधितः शम्भुर्न तया तर्पिता द्विजाः ।
न मया तोषितो विष्णुर्दीननाथाङ्गपालनात् ॥ २२॥

न तीर्थेषु न पात्रेषु न पर्वसु कदाचन ।
काकिणीमात्रमप्याहो दत्तमन्यस्य का कथा ॥ २३॥

 इत्थं चिन्तातुरस्यास्य पुरतः कश्चिदागतः ।
सिद्धोऽवधूतो दिग्वासा दीप्तनेत्रो महाप्रभः ॥ २४॥

तं प्रणम्यादरेणासौ पृष्टवान्यद्विचिन्तितम् ।
ब्रूहि योगिन् कथं सम्पज्जाता मे धनदोपमा ॥ २५॥

प्रहस्याह महायोगी का ते सम्पद् विवर्णय ।
स प्रोवाच महाभाग श्रूयतां यदि रोचते ॥ २६॥

एतेऽष्टकोटयोऽर्थानां कोटयोऽश्वतरीगणाः ।
महामरकता नीला गारुडास्तादृशा मम ॥ २७॥

मुक्ताफलानां नवतीः कोटीनां मद्गृहे तथा ।
सत्येवं मणयोऽनन्ता वाससां पर्वता इमे ॥ २८॥

धातूनां शिखराण्याह दशलक्षं गृहे मम ।
तादृशाः कोटिगुणिताः सम्भाराः सन्ति हे प्रभो ॥ २९॥ ।

धान्यक्षेत्रगजानीकस्यन्दनादिभिरुज्ज्वलाः ।

सर्वदेशेष्वहं मान्यो घनाढ्यानां महत्तमः ॥ ३०॥

केन पुण्येन सञ्जातो न जानाम्यत्रकारणम् ।
स प्रोवाच महाभाग कथ्यतां कृपया हि तत् ॥ ३१॥

अवधूत उवाच ।
पुरा त्वं याचको दीनो विप्रो जन्मनि सप्तमे ।
यावज्जन्म परान्नेन तुष्टो लुब्धोऽतिशोच्यधीः ॥ ३२॥

स कदाचिच्चरन्नुर्वीं नीरातीरमुपागतः ।
एकादश्यां फलाहारमपिनो लब्धवानिह ॥ ३३॥

क्षुधातुरस्य दीनस्य रात्रिरन्नैककाङ्क्षिणः ।
जागरेण व्यतीता सा भ्रमतो देवमन्दिरे ॥ ३४॥

प्रसङ्गाद्दैवतो रात्रौ पूजानरहरेरलम् ।
भक्तैः कृतालोकिता ते नामानि शृण्वतो हरेः ॥ ३५॥

प्रभाते सङ्गमे स्नात्वा लक्ष्मीतीर्थमुपागतः ।
पल्लवस्थान्यवान्प्रादाः कस्मैचिद् द्विजलिङ्गिने ।
ततः कालवशं यातः प्रापितो यमसन्निधौ ।
तावद्यमेन प्रयता गच्छ गच्छेति भाषितः ॥ ३७॥

तदैव दक्षिणे देशे द्राविडेषु नरेश्वरः ।
जातस्त्वं सर्वभोगाढ्यः पञ्चवारं सुजन्मसु ॥ ३८॥

पञ्चप्रदक्षिणा रात्रौ भ्रमता विहितास्त्वया ।
तेन पुण्येन राजेन्द्रः पञ्चजन्मनि भोगवान् ॥ ३९॥

तेन गन्तासि वैकुण्ठं यतो नावर्तनं पुनः ।
अधुनोपोषणं यत्ते कृतमेकादशीदिने ॥ ४०॥

पूजादर्शनपुण्येन प्राप्तवानद्य सन्मतिम् ।
यवदानेन सम्पत्तिं गतोऽसि वणिजाम्पते ॥ ४१॥

अत्राण्वपि हि यत् किञ्चित्सुकृतदुष्कृतं कृतम् ।
न तस्यान्तोऽस्ति कल्पान्ते यत्रोदाहरणं भवान् ॥ ४२॥

श्रीशिव उवाच ।
इत्युक्त्वा स तु योगीन्द्रो दत्तात्रेयो महामुनिः ।

तत्रैवान्तर्दधे सोऽपि विस्मयं परमं गतः ॥ ४३॥

दत्वा सर्वस्वमार्येभ्यो यज्ञैरिष्ट्वा सुदक्षिणैः ।
तत्रैव संस्थितो निन्ये शेषमायुरकिञ्चनः ॥ ४४॥

जितेन्द्रियो जितश्वासो ध्यायन्नरहरिं हृदि ।
ददर्शाग्रे स्थितं दिव्यं विमानं तैजसं महत् ॥ ४५॥

सद्यश्चतुर्भुजोपेतो दिव्यालङ्कारभूषणः ।
दिव्यवेषो विमानं तदारुरोह मुदायुतः ॥ ४६॥

स वैकुण्ठे हरेर्दासो विष्णुदास इतीरितः ।
अद्यापि राजते श्रीमान् विष्णुचिन्हैरलङ्कृतः ॥ ४७॥

इति सूत्रेण महिमा लक्ष्मीतीर्थस्य वर्णितः ।
अस्य स्मरणमात्रेण महापापैः प्रमुच्यते ॥ ४८॥

@इति श्रीपद्मपुराणे नृसिंहपुरमाहात्म्ये श्रीशिवपार्वतीसंवादे
श्रीलक्ष्मीतीर्थप्रभाववर्णनं नाम पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः

देव्युवाच ।
लक्ष्मीतीर्थस्य महिमा श्रुतो देव मुखात्तव ।
अन्येषां तीर्थवर्याणां माहात्म्यं वक्तुमर्हसि ॥ १॥

श्रीशिव उवाच ।
लक्ष्मीतीर्थात् पृष्ठभागे धनुषां पञ्चविंशतिः ।
पद्मतीर्थं महापुण्यं सर्वेषां सिद्धिदायकम् ॥ २॥

भगवद्दर्शनानन्दविकलायाः कराग्रतः ।
पद्माया गलितं पद्मं पद्मतीर्थं ततो विदुः ॥ ३॥

कुबेरो यत्र सम्प्राप्तो यतः पद्मनिधि पुरा ।
अद्यापि पद्मतीर्थस्य सेवका न दरिद्रिणः ॥ ४॥

वामे पद्मनिधेः पूर्वे भागे शङ्खनिधिः स्थितः ।
गदातीर्थं पवित्रं च विद्यते शृणु पार्वति ॥ ५।
चतुर्णामिहतीर्थानां महिमा दुर्लभः कलौ ।

स्मरणात्सर्वपापघ्नो दर्शनान्मुक्तिदो मतः ॥ ६॥

देवस्य वामे पुरतो गदातीर्थमनुत्तमम् ।
गदाधरो यत्र देवो गयापुण्यं ददात्यसौ ॥ ७॥

नीरायां लक्ष्मीतीर्थात् धनुषां पञ्चविंशतिः ।
गदातीर्थं गयायास्तु कोटिश्राद्धफलप्रदम् ॥ ८॥

पितरः सर्वदेच्छन्ति गदातीर्थोदकक्रियाम् ।
श्राद्धस्याकल्पिकी तृप्तिराकल्पं तीर्थं हि स्मृतम् ॥ ९॥

गदातीर्थे कृतस्नानतर्पणश्राद्धदानतः ।
मनुजो लभते सिद्धिं प्रसादान्नृहरेः प्रिये ॥ १०॥

पुरा कश्चिद् द्विजश्रेष्ठो दाक्षिणात्यः शुचिव्रतः ।
पितृणां निष्कृतिं प्रेप्सुर्गच्छस्तीर्थ व्रती गयाम् ॥ ११॥

आगतो नीरया यत्र गदातीर्थं सुसंस्कृतम् ।
कृतवान् स्नानदानादि शृद्धायुक्तः पितृव्रतः ॥ १२॥

तावद्ददर्श दिव्याङ्गान् विमानैश्चरतो दिवम् ।
स्वपितृन्परिसन्तृप्तान् साधु साध्विति वादिनः ॥ १३॥

त ऊचुर्ब्राह्मणवरं पुत्र ते तारिता वयम् ।
गदातीर्थप्रभावेण गच्छामो हरिमन्दिरम् ॥ १५॥

गृहं त्वं गच्छ तीर्थानि कृतानि नो विनिष्कृतिः ।
अधुना प्रयोजनं नास्ति वत्स तीर्थाटनस्य ते ॥ १५॥

श्रुत्वा पितृवचोऽभीक्ष्णं विस्मितोऽभूद् द्विजोत्तमः ।
गदातीर्थे चिरं स्थित्वा देहान्ते हरिमाप सः ॥ १६॥

(??)पश्चिमतो धनुषामेकविंशतिः ।
पिशाचमोचनं नाम तीर्थं पावनमस्ति हि ॥ १७॥

तत्र किञ्चित्पुरावृत्तं देवि ते कथयाम्यहम् ।
विष्णुशर्मेति विप्रोऽभूदथर्वण इति स्मृतः ॥ १८॥

स्मरन्नरहरिं नित्यं सदाचारो दयान्वितः ।
कदाचित्काशिकां द्रष्टुमीयुषां सहचारिणाम् ॥ १९॥

सङ्गाद्गच्छन्पथि श्रान्तो विन्ध्याद्रेरधरे स्थितः ।
तावदग्रेऽभवत्तस्य धूमराशिर्महोल्बणः ॥ २०॥

चक्षुषा केवलं वृक्षानुत्तुङ्गानपि यो दहन् ।
तन्मध्ये ददृशे तेन विप्रेण सहसा तदा ॥ २१॥

अस्थिमात्रैकसञ्छन्नो दीर्घग्रीवा भयानकः ।
पिङ्गश्मश्रु धूम्रत्वचः प्राणिनां प्राणहारकः ॥ २२॥

बहुभिः परिनृत्यद्भिः परीतः प्रेतवृन्दकैः ।
भीषयन् पथिकान् खादन् विप्राग्रेऽवस्थितः खलु ॥ २३॥

विष्णुशर्मा नृसिंहेति जगदोच्चैः सहानुगैः ।
स तत्तीर्थोदकं तेषामुपरि प्राक्षिपत्तदा ॥ २४॥

तज्जलस्पर्शमात्रेण नृसिंहनामकीर्तनात् ।
सद्यो दिव्यतनुर्भूत्वा विमानस्थोऽभवन्मुदा ॥ २५॥

प्रेत उवाच ।
मोचिता भवता विप्र तीर्थाम्बुस्पर्शनाद्वयम् ।
गच्छामो विष्णुभवनं प्रसादात्तव पावनम् ॥ २६॥

दिव्यं ज्ञानं ममोत्पन्नं नृसिंहाख्यास्मृतेर्वरम् ।
इदानीं पृच्छ यद्वाञ्छा सर्वं ते कथयाम्यहम् ॥ २७॥

विष्णुशर्मोवाच ।
कस्त्वं प्रेतवपुः पापात्कस्माज्जातमिदं प्रभो ।
जलस्य कस्य संस्पर्शाद् गतोऽसि हरिमन्दिरम् ॥ २८॥

प्रेत उवाच ।
पुराहं राजवर्यस्य भोजनाम्नो यशस्विनः ।
पुरोहितोऽभवं विप्रो वेदवेदाङ्गपारगः ॥ २९॥

एते सहाय्यका विप्रा मम शास्त्रविशारदाः ।
एतैर्मया पराभूता बहवः पण्डितोत्तमाः ॥ ३०॥

छलेन परिहारेण वृत्त्या ते परिहारितः ।
राज्ञा न पूजिताः केचिन्मया तृणसमाः कृताः ॥ ३१॥

दानव्रततपोहोमैरर्चयित्वा धनं बहु ।

अदान्ता उग्रकर्माणो ब्रह्मद्वेषेण सर्वदा ॥ ३२॥

प्राप्ता पापीयसीं योनिः पैशाचीं स्मृतिनाशिनीम् ।
भवता मोचिता ह्यद्य जलस्पर्शेण सन्मते ॥ ३३॥

विष्णुशर्मोवाच ।
कुतोऽस्य महिमा साधो जलस्य प्रेतमोचने ।
त्वर्णय यदि कृपा मयि ते स्यादलौकिकी ॥ ३४॥

प्रेत उवाच ।
साधो य एष कलशो हस्ते ते वर्ततेऽधुना ।
पिशाचमोचनजलस्यैतस्मिन्नार्द्रताभवत् ॥ ३५॥

तत्सङ्गात्पावनं वारि बभूव कलशेस्थितम् ।
येन प्रेतत्वमुत्सृज्य प्राप्ता दिव्यां गतिं द्विज ॥ ३६॥

गदातीर्थाग्रतो दीप्तं वर्तते तीर्थमुत्तमम् ।
पिशाचमोचनं नाम येन सम्मोचिता वयम् ॥ ३७॥

पिशाचमोचने स्नात्वा तर्पयित्वा पितॄन् द्विजान् ।
उद्धरेन्नरकाम्भोधेः पितॄन् प्रेतांश्च पूर्वजान् ॥ ३८॥

नित्यं परिचरेद्यस्तु तीर्थं पैशाचमोचनम् ।
तस्याज्ञानपिशाचत्वं सद्यो नश्यति बन्धकृत् ॥ ३९॥

पुरात्र हरिणा दत्तो लोकानां हितकाम्यया ।
पिशाचमोचने मुक्तिः वरः कामफलप्रदः ॥ ४०॥

असंस्कृताः संस्कृतास्तु संस्कृता मोक्षभाजनाः ।
न तथान्यच्छोभते तीर्थं यथेदं तीर्थमुत्तमम् ॥ ४१॥

अत्राहं गुरुरूपेण स्थित्वा स्नानार्द्रवर्ष्मणाम् ।
चित्ते दिशामि तज्ज्ञानं येन बन्धाद्विमुच्यते ॥ ४२॥

दूरस्थेनापि पापेन स्तुतिः पैशाचमोचिनी ।
श्राव्या शृद्धान्वितो भूत्वा मत्कृता मोक्षप्राप्तये ॥ ४३॥

इत्युक्त्वा नृहरिस्तत्र बभूवान्तर्हितो द्विज ।
नीरा तस्योपरिगता पुण्या या नृहरेस्तनुः ॥ ४४॥

अधुना त्वरं तीर्थं तीर्थानामुत्तमं खलु ।

वर्तन्ते दिव्यवपुषो यत्र स्नात्वा द्विजोत्तम ॥ ४५॥

श्रीशिव उवाच ।
श्रुत्वा प्रेतस्य वचनं दृष्ट्वा गतिमनुत्तमाम् ।
विष्णुशर्मा विस्मितोऽगात्पुनर्नीरातटं शुचिः ॥ ४६ ॥

पिशाचमोचने स्थित्वा स्तुत्वा नरहरिं तदा ।
मुक्तोऽभव्विष्णुशर्मा भवबन्धात्तदा प्रिये ॥ ४७॥

पिशाचमोचनाख्यानं ये शृण्वन्ति नरोत्तमाः ।
तेऽपि मुक्ता भवोद्बन्धाद्यान्ति विष्णोः परं पदम् ॥ ४८॥

@इति श्रीपद्मपुराणे नृसिंहपुरमाहात्म्ये श्रीशिवपार्वतीसंवादे
पिशाचमोचनतीर्थवर्णनं नाम षष्ठोऽध्यायः ।

सप्तमोऽध्यायः

देव्युवाच ।
पिशाचमोचनाख्यानं श्रुतं परममद्भुतम् ।
इदानीं श्रोतुमिच्छामि स्तुतिं पैशाचमोचिनीम् ॥ १ ॥

हरिः कस्मादिमां पुण्यां कृतवान् स्तुतिमुत्तमाम् ।
त्वर्णय महादेव यया बन्धाद् विमुच्यते ॥ २ ॥

श्रीशिव उवाच ।
पुरा कल्पादिसमये विष्णुर्नाभेरभूदजः ।
चतुर्युसहस्रान्ते तस्य निद्रामुपेयुषः ॥ ३ ॥

विष्णुकर्णमलोद्भूतौ सञ्जातौ मधुकैटभौ ।
ताभ्यामुपाहृताः सर्वे वेदा विश्वस्य साधनम् ॥ ४॥

काले सिसृक्षात्तावद् वेदा अस्मरणं गताः ।
ततः पिशाचवज्जज्ञे ब्रह्मा दानवभीतितः ॥ ५॥

तस्य नारायणोऽनन्तो दिदेश स्तोत्रमुत्तमम् ।
ब्रह्मणः पुरतो स्थित्वा मन्त्रराजात्मकं शिवम् ॥ ६ ॥

तेन प्रबुद्धो भगवान् ब्रह्मा लोकपितामहः ।
अस्मरद्वेदमखिलं ज्ञानं यत्पौर्वकालिकम् ॥ ७॥

तदहं तेऽभिधास्यामि नारायणवरादिदम् ।
श्रुतं ब्रह्ममुखाद्देवि सर्वार्थानां प्रसादकम् ॥ ८॥

विशुद्धमजमानन्दमेकमात्रमखण्डितम् ।
सच्चिन्मात्रं परं शान्तं यत्तद् ब्रह्म नमाम्यहम् ॥ ९॥

यद्भासा निखिलं भाति यस्यनान्यत्प्रकाशकम् ।
पुराणमव्ययं ज्योति तद्धि ब्रह्म नमाम्यहम् ॥ १०॥

यदेकं सर्वरूपेषु प्रतिरूपतया स्थितम् ।
ज्योतिर्यथोदपात्रेषु तद्धि ब्रह्म नमाम्यहम् ॥ ११॥

यदन्तः सर्वभूतानां यत्तद्रूपमबाधितम् ।
मेवाभरणादीनां तद्धि ब्रह्म नमाम्यहम् ॥ १२॥

यदेकं सर्वभावानां निरन्तरमदूषितम् ।
चिन्मात्रं निष्फलं पूर्णं तद्धि ब्रह्म नमाम्यहम् ॥ १३॥

येनार्थान् भजते जन्तुरन्द्रियेषु मनस्यपि ।
निरहङ्कारमानन्दं तद्धि ब्रह्म नमाम्यहम् ॥ १४॥

यन्मनो मनसां प्राणः प्राणानामिद्रियं वरम् ।
सर्वात्मकमखण्डं सत्तद्धि ब्रह्म नमाम्यहम् ॥ १५॥

यन्नामगुणरूपाद्यैर्विचित्रमपि सर्वगम् ।
अज्ञेयं पशुबुद्धीनां तद्धि ब्रह्म नमाम्यहम् ॥ १६॥

यस्मादुदेति स्विश्वं येन जीवति वर्धते ।
यस्मिन्प्रलीयते सर्वं तद्धि ब्रह्म नमाम्यहम् ॥ १७॥

यतो वागादयो भावा उत्थिताः स्वस्वकर्मसु ।
प्रवर्तते साक्षिरूपात्तद्धि ब्रह्म नमाम्यहम् ॥ १८॥

सकलं निष्कलं व्योम मायातीतं निरञ्जनम् ।
अस्ति नास्ति द्वयातीतं तद्धि ब्रह्म नमाम्यहम् ॥ १९॥

यद् ग्रासकं ग्रासकाणां वीराणां च विवर्धनम् ।
व्यापकं व्यापकानां च तद्धि ब्रह्म नमाम्यहम् ॥ २०॥

यज्ज्वालयति कालाद्यांस्तमो येन प्रकाशते ।
महाज्वालातमोरूपं तद्धि ब्रह्म नमाम्यहम् ॥ २१॥

यत्सर्वतो वदनवत्सर्वतः करपाच्छिरः ।
सर्वतो नयनं श्रोत्रं तद्धि ब्रह्म नमाम्यहम् ॥ २२॥

यद्विचारवतां नृणां बन्धोऽनादितमोभवः ।
सद्यो नश्यति शारीरस्तद्धि ब्रह्म नमाम्यहम् ॥ २३॥

यस्याज्ञयानिलार्केदुर्मृत्युवन्हिग्रहादयः ।
सर्वे कर्मसु वर्तते तद्धि ब्रह्म नमाम्यहम् ॥ २४॥

यन्नाम मङ्गलतमं मङ्गलानामनुत्तमम् ।
स्तुतिभिस्तूयते वेदैस्तद्धि ब्रह्म नमाम्यहम् ॥ २५।
यस्यात्मत्तां विन्दां मृत्युरनादिम्रियतेक्षणात् ।
मृत्युमारणमापूर्णं तद्धि ब्रह्म नमाम्यहम् ॥ २६॥

निषिध्य सर्व लोकेऽस्मिन्यच्छेषमुपलभ्यते ।
सत्तामात्रमनिर्देश्यं तद्धि ब्रह्म नमाम्यहम् ॥ २७॥

पूर्णमन्तर्बहिः पूर्णं येन पूर्णेन पूर्यते ।
पूर्णस्य पूर्णमाकाशं तद्धि ब्रह्म नमाम्यहम् ॥ २८॥

एतद्देवि महास्तोत्रं महापैशाचमोचनम् ।
यत्र कुत्र स्मरन् जन्तुर्ब्रह्मसायुज्यमश्नुते ॥ २९॥

कैवल्याद्यखिलार्थानामिदमेवेहकारणम् ।
नृहरेर्मन्त्रराजस्य स्तोत्रं पैशाचमोचनम् ॥ ३०॥

एतत्पठणतो याति मुक्तिमात्यन्तिकीं नरः ।
किं पुनः सर्वभोगाद्यांस्तुच्छ्य् दीनेषुसम्मतान् ॥ ३१॥

एतत्प्रसङ्गतः प्रोक्तं स्तोत्रं तेऽभीष्टसिद्धिदम् ।
अधुना शृणु वक्ष्याभि शेषतीर्थानि सूत्रतः ॥ ३२॥

पिशाचमोचनात्पश्चात्तीर्थं गारुडसंज्ञितम् ।
गरुडेन तपस्तप्त्वा यत्र लब्धं महद्बलम् ॥ ३३॥

जित्वामरेश्वरं सङ्घे सुधां हृत्वा बलात्ततः ।
विमुच्य मातरं दास्याद् विनतामजितोऽभवत् ॥ ३४॥

तोषयित्वा रणे विष्णुं तेनायं याचितो मुदा ।

वाहनन्त्व गतो जग्ध्वा पन्नगान्कोटिशोऽभितः ॥ ३५॥

तत्तीर्थे स्नानदानेन सर्ववेदसमुद्भवम् ।
पुण्यं प्राप्नोति कल्याणि यत्र कुत्र मृतोऽपि सः ॥ ३६॥

ततोनृसिंहतीर्थं वे क्रोशमात्रं वरानने ।
हिरण्यकशिपुं हत्वा यत्र देवो व्यवस्थितः ॥ ३७॥

तत्तीर्थस्य प्रभावो हि मया वक्तुं न शक्यते ।
सर्वार्थदं मोक्षबीजं तीर्थं तत्परमं प्रिये ॥ ३८॥

श्रीमन्नृसिंहः सम्पूज्यो भक्तविघ्नौघनाशनः ।
नानोपहारैः क्षेत्रस्य महाभीत्युपशान्तये ॥ ३९॥

एतानि तीर्थमुख्यानि वामे देवस्य चाग्रतः ।
एकैकस्मिन् वसन्तीह कोटिशस्तीर्थराशयः ॥ ४०॥

इन्द्रतीर्थं ततःपुण्यमन्वितं कोटितीर्थकैः ।
हरिर्नायासतो यत्र ररक्षेद्रं हि पातकात् ॥ ४१॥

श्वेततीर्थं च तस्याग्रे हंसतीर्थं वदन्त्यदः ।
हंसावतारो भगवान् यत्र ज्ञानमदीदिशत् ॥ ४२॥

तस्यैव परितः सन्ति तीर्थानि सनकादिभिः ।
कृतानि योगिभिः पुण्यान्ययुतानि चतुर्दश ॥ ४३॥

मरीचिरत्रिः पुलहो वसिष्ठः क्रतुरङ्गिराः ।
पुलस्त्यो देवलः सोमो दक्षो गीष्पतिरत्रिजः ॥ ४४॥

वरुणो धनदो वायुर्यमोऽग्निर्निरृतिर्वसुः ।
स्वनाम्ना तीर्थमुख्यानि कृत्वा सिद्धिं परां गताः ॥ ४५॥

सर्वतीर्थं ततः पुण्यं तीर्थैर्यत्र तपः कृतम् ।
नृहरेरर्चनात्प्राप्तं पापघ्नं पुण्यदं बलम् ॥ ४६॥

तारातीर्थं महापुण्यं यत्रतारा तपःस्थिता ।
रघुवीरप्रसादेन गता ज्ञानमखण्डितम् ॥ ४७॥

दुर्वासतीर्थमतुलं कपिलस्यच योगिनः ।
यत्रैकाक्षरजाप्येन गतावात्यन्तिकीं गतिम् ॥ ४८॥

एतान्यन्तरतो नीराभीमयोः क्षेत्रमध्यतः ।
तीर्थान्यन्यानि च कलौ प्रवक्ष्यन्त्यन्यनामभिः ॥ ४९॥

भीमामध्ये च तीर्थान्यधुना ते ब्रवीम्यहम् ।
एषां नामानि संस्मृत्य महापापैः प्रमुच्यते ॥ ५०॥

@इति श्रीपद्मपुराणे श्रीनृसिंहपुरमाहात्म्ये श्रीशिवपार्वती
संवादे तीर्थमहिमावर्णनं नाम सप्तमोऽध्यायः ।

अष्टमोऽध्यायः

श्रीशिव उवाच ।
दुर्गातीर्थं महापुण्यं सर्वदुर्गोपशान्तिकृत् ।
यत्र स्नानकृतां नृणां दुर्गतिर्नाशतां गता ॥ १॥

कालरूपं ततः पूर्वे महाकालस्य सन्निधौ ।
उज्जयिन्याः शतगुणं फलं यच्छति मज्जतः ॥ २॥

भीमानृसिंहपुरतो महानादेश्वरोऽर्चितः ।
क्षेत्रान्तरात्कोटिगुणं फलं यच्छति निश्चितम् ॥ ३॥

दुर्गया विमले तीर्थे देवोऽयं विमलेश्वरः ।
वाराणश्या अपि महत्फलं यच्छति पूजितः ॥ ४॥

कुरुक्षेत्रात्तीर्थवरात् स्थाणुर्यत शिलामयः ।
दानाद्यैः पूजितो भक्त्या फलं यच्छत्यसंशयम् ॥ ५॥

तत्रैव पञ्चहस्तेन कोटितीर्थं महाफलम् ।
तत्र स्नात्वा समभ्यर्च्य गोकर्णात्कोटिपुण्यभाक् ॥ ६॥

बह्न्यन्यानि क्षेत्राणि विद्यन्ते च महेश्वरि ।
विदिक्षु दिक्षु परितः क्रमादेव निबोध मे ॥ ७॥

तेजस्तीर्थे महातेजाः शङ्कुकर्णो विराजते ।
सर्वतीर्थे कृत्तिवासा एकाम्बरसहायवान् ॥ ८॥

कालाञ्जने नीलकण्ठ ऊर्ध्वरेतास्त्रिदण्डके ।
छागलण्डे कपर्दीशः शोभते शृणु पार्वति ॥ ९॥

गङ्गायां च जयन्तो वै पुरुके चादिसंहतः ।

गोकर्णस्याभितः सौम्ये संस्थितः कुक्कुटः प्रिये ॥ १०॥

ततो भीमाजले रम्ये ब्रह्मावर्तेऽथ देवराट् ।
ततोऽग्नितीर्थे सोमेशः प्रभासेन सहस्थितः ॥ ११॥

ततो गयायां फल्गुस्थो धर्मेशः परमो महान् ।
वामेश्वराज्जटादेवो हरिश्चन्द्राद्धरीश्वरः ॥ १२॥

वृषध्वजाद् वृषेशश्च भवो वै वात्सनापथात् ।
भद्रकर्णाच्छिवः साक्षाद्धर्मलिङ्गाद्धरेश्वरः ॥ १३॥

नेपालात्पशुपो देवो दारुक्षेत्रात्तु दण्डधृक् ।
उग्रः कनकलादुद्रालयाद्रुद्रः समागतः ॥ १४॥

केदाराद् गर्भईशानः सहस्राक्षः सुवर्णतः ।
सर्वमेध्याच्च सर्वेशः श्रीशैलात् त्रिपुरान्तकः ॥ १५॥

जालेश्वरात् त्रिशूली च काश्मीराद्विजयेश्वरः ।
आम्रातकाच्च सूक्ष्मेशश्चण्डेशो मरुजाङ्गलात् ॥ १६।
रुद्रकोटान्महायोगी शूलटङ्कः प्रयागतः ।
महाव्रतो महेन्द्राच्च मरुकोटान्महोत्कटः ॥ १७॥

अयोगीशः पुष्कराच्च करवीरात्कपालभृत् ।
माहेश्वर् दीप्तिनाथो भूतेशाद् भस्मगात्रवान् ॥ १८॥

गङ्गासागरतो देवोऽमरेशोऽपि समागतः ।
विन्ध्याद् धरणिवाराहः कैलासाद् गणनायकः ॥ १९॥

हेमूकूटाद् विरूपाक्षः पातालाद् हाटकेश्वरः ।
किरातेशः किरातारव्याज्जललिङ्गाज्जलेश्वरः ॥ २०॥

अनलेशो वाडवास्यादोङ्कारोऽमरकण्टकात् ।
देवकायादुमानाथो विरजस्काद् विरोचनः ॥ २१॥

लङ्काया मरुकेशानो गङ्गाद्वाराद् हिमेश्वरः ।
नकुलेशात्स्वयम्भूर्वै लकुलीकात्परोहतः ॥ २२॥

सप्तगोदावरीतीर्थाद् भीमेओ भीमविक्रमः ।
कर्णिकाराद् गुणाध्यक्षो त्रागताद्धि गदाधरः ॥ २३॥

भूर्भुवः स्वः पतिर्देवो गन्धमादनतः प्रिये ।

काश्या विश्वेश्वरो देव उमानाथः समागतः ॥ २४॥

समागतानि तीर्थानि देवतैः सह सत्पुरम् ।
द्रष्टुं नृसिंहरूपं वै सर्वार्थैकामरद्रुमम् ॥ २५॥

भीमायां पञ्चहस्तानामन्तरेण स्थितान्यलम् ।
ऐकैकस्य महत्त्वं हि मया व्याख्यातुमक्षमम् ॥ २६॥

अनन्तसिद्धिमापन्ना एतेषु स्नानदानतः ।
मुक्ताः कति न जानेऽहं त्रिलोकेशोऽपि वै प्रिये ॥ २७॥

अत्राप्याख्या पुण्यतमा गीयन्ते नारदादिभिः ।
रहस्यं भीमरथ्याश्च सर्वेषां सर्वकामदम् ॥ २८॥

एकदा मुनयः सर्वे तीर्थयात्रां चिकीर्षवः ।
वृन्दशो धरणीं चेरुब्रह्मिष्ठाः सर्वदर्शिनः ॥ २९॥

विश्वोमित्रो वामदेवो भरद्वाज ऋभुः क्रतुः ।
अगस्त्यः कण्व उत्तङ्को देवलो भार्गवोऽसितः ॥ ३०॥

व्यासाद्याः सङ्घशः शिष्यैश्चरित्वाभुवत्रयम् ।
श्रान्ता अप्राप्तसन्तोषा बभूवुस्ते तदा प्रिये ॥ ३१॥

मार्गे तीर्थकथां स्वैरं कुर्वन्तो गुणबुद्धयः ।
मिथो विचारयामासुः किं श्रेष्ठं तीर्थमुत्तमम् ॥ ३२॥

कः काशीं कश्चनावन्ती केऽपि तीर्थान्यनेकशः ।
विवदन्तः प्रशंसतो नैवापुःस्थैर्यमात्मनः ॥ ३३॥

तेषु ज्ञानवतां राजा वसिष्ठो मौनमास्थितः ।
विज्ञापितो मुनिवरैर्मुने कस्मान्न भाषसे ॥ ३४॥

स प्रोवाच विवादे वो नास्त्येकोऽपि नियामकः ।
विनैकं नारदमृषिं महाभागवतोत्तमम् ॥ ३५॥

ते तद्वाक्यं प्रशंसन्तः प्रोचुःक्वासौ स नारदः ।
वञ्चयित्वाखिलान् गूढः किं तीर्थमनुसेवते ॥ ३६॥

एवं हि विचारपरा मनोयोगाद्वियोगिनः ।
विचिन्वाना ब्रह्मपुत्रं भीमातीरे स्थितं ययुः ॥ ३७॥

वीरासनास्थं विमलाम्बर सृजं विरागमानन्दभरेण पीवरम् ।
भ्रूमध्यदृष्टिं परमं समाधिना विलोकयन्तं नरसिंहमात्मनि ॥ ३८॥

वीक्ष्य भावेन देवर्षि ब्रह्मर्षिप्रवरा नताः ।
आस्थिता परितो यत्र भीमा दक्षिणवाहिनी ॥ ३९॥

प्रोचुः प्राञ्जलयः श्रान्ता वयं देव मुनीश्वर ।
अलब्धान्यत्र विश्रान्तिं प्राप्तास्तेऽतिकमादरात् ॥ ४०॥

मूढानां क्लेशखिन्नानामस्माकं तीर्थवेदने ।
संशयं वचसापोह्य सुखकर्तुमिहार्हसि ॥ ४१॥

नारद उवाच ।
अहो ब्रह्मर्षयः पुण्या हित्वा मानं धियं पराम् ।
श्रोतुं वाञ्छा यद्यस्ति वक्ष्ये वोऽसंशयं वचः ॥ ४२॥

पुरोक्तं ब्रह्मणा पित्रा पुत्रेभ्यो नः परं वचः ।
यत्र विष्णुशिवौ युक्तौ नानारूपौ जगत्पती ॥ ४३॥

तत्र क्षेत्राणि तीर्थानि देवा मुक्तिः क्रिया फलम् ।
तदहं मनसा ध्यात्वा सर्वतीर्थैकसङ्ग्रहम् ॥ ४४॥

ब्रह्मणो वचनादत्र वसामि सुखमादरात् ।
अत्र तीर्थानि सर्वाणि क्षेत्राणि च महर्षयः ॥ ४५॥

वसतिं करोति पुण्येयं भीमा दक्षिणवाहिनी ।
अत्र भुक्तिश्च मुक्तिश्च पुरुषार्थोऽत्रपुष्कलः ॥ ४६॥

इयं भीमा महादेवो नीरा साक्षाद्रमापतिः ।
उभयोः सङ्गमो यत्र तत्रैवात्यन्तिकी गतिः ॥ ४७॥

एतद्रहस्यं परमं निधानमिव पीठके ।
गुप्तं भूगोलके धात्रा सर्वेषां मोक्षसाधनम् ॥ ४८॥

श्रीशिव उवाच ।
श्रुत्वेदं नारदोक्तं वै दिव्यज्ञाना महर्षयः ।
ज्ञात्वा रहस्यं क्षेत्रेऽस्मिन्नास्थिता विश्रमं पदम् ॥ ४९॥

ततः प्रभृति बभूवुस्ते निर्भरानन्दमोदिताः ।
श्रीनृसिंहस्थितिजुषः क्षेत्रस्यास्य प्रभावतः ॥ ५०॥

याते कियति काले तैर्हृतसर्वेन्द्रियक्रियैः ।
समाधिनिरतैः सर्वैर्ददृशे वै महाद्भुतम् ॥ ५१॥

सर्वतीर्थानि मूर्तानि क्षेत्राणि च महात्यंहो ।
पूजयन्ति स्म नृहरिं नीराभीमाम्बुसङ्गमे ॥ ५२॥

हरिपूजाभरालोकात्पुण्यौघमुपलभ्य वै ।
विचेरुः स्वेषु स्थानेषु नीडेषु पक्षिणो यथा ॥ ५३॥

सायं प्रातश्च मध्याह्नेनृहरेः पूजनोदये ।
सर्वतीर्थानि क्षेत्राणि द्रष्टुं यान्ति दिनेदिने ॥ ५४॥

इत्यालोक्याद्भुतं सर्वे विस्मिता नृहरेः पदम् ।
प्रशंसन्तो विचेरुस्ते स्वस्वमालयमादरात् ॥ ५५॥

@इतिश्रीपद्मपुराणे श्रीनृसिंहपुरमाहात्म्ये श्रीशिवपार्वतीसंवादे
भीमामद्यतीर्थवर्णनं नाम अष्टमोऽध्यायः ।

नवमोऽध्यायः

गोतीर्थं प्रथितं लोके शृणु त्वं मृगलोचने ।
यदाख्यानं पितृगणैर्मुदा संस्तूयते सदा ॥ १॥

प्रह्लादाय प्रसन्नाय प्रसन्नं जगतां पतिम् ।
ययुर्द्रष्टुं सुरेशानं मुनीन्द्राद्या वरूथशः ॥ २॥

आकीर्णवलयैः पुष्पैः स्तुत्वा स्तोत्रैरनेकशः ।
महाभिषेकसम्भारं चक्रुस्ते परमादरात् ॥ ३॥

पञ्चामृतानि सरितां पीठं पुण्यतमैर्जलैः ।
ओषधीर्धरणीदेवी पीठं शेषोऽप्युपानयत् ॥ ४॥

तदा कामदुहो गावो बभूवुर्वै सहस्रशः ।
नारसिंहं समालोक्य प्रस्तुतस्तनमन्धराः ॥ ५॥

आगत्य चिन्तामणिना कृतं नीराजनं प्रिये ।
वामे स्थितेन भक्त्या तं ववर्षुः पायसीं सृतिम् ॥ ६॥

पयसा स्नापयित्वेशं गावो दक्षिणतः स्थिताः ।
मार्गयन्त्यो नृहरेः प्रसादं विमलाशयाः ॥ ७॥

तां समालोक्य संसिद्धिं चेतसो भक्तिभावितम् ।
उवाचेदं प्रसन्नात्मा नृहरिर्भक्तवत्सलः ॥ ८॥

श्रीभगवानुवाच ।
वरो वः श्रूयतां गावो भक्त्या तुष्टस्य मे परः ।
भवतीभिः पयोधारा मुक्ता या मम मूर्धनि ॥ ९।
धारातीर्थं तदेवेदं गोतीर्थमिति विश्रुतम् ।
भविष्यति महापुण्यं पितृणां तोषकारणम् ॥ १०॥

कुरुक्षेत्रे प्रयागे च गयायामन्यधामसु ।
या तृप्तिःशतवर्षैःस्याच्छ्राद्धे सा लभ्यते सकृत् ॥ ११॥

गोतीर्थे स्नानदानादि कुर्वतां वसतिः प्रिये ।
कल्पान्ते मत्प्रसादेन भवेद्धि सन्निधौ मम ॥ १२॥

दक्षे कामदुहो वामे चिन्तामणिगणेश्वरः ।
पृष्ठे कल्पद्रुमोऽश्वत्थः प्रियं मे त्रयमुत्तमम् ॥ १३॥

पर्वपर्वसु गोयात्रा चतुर्थ्यां गणपूजनम् ।
मन्दवारेऽश्वत्थसेवा नियता सफलार्थिनाम् ॥ १४॥

अहो तीर्थानि सरितो देवर्षिमनुजादयः ।
गोतीर्थे स्नाततृप्त्यर्थं पितृणां कामसिद्धये ॥ १५॥

श्रीशिव उवाच ।
आदेशमिममाकर्ण्य सर्वे गोपयसां ह्रदे ।
चक्रःस्नानानि दानानि पितृणां तृप्तिहेतवे ॥ १६॥

तदा प्रजानां पितरस्तत्क्षणाद्दिव्यवर्चसः ।
मूर्तस्तुष्टाःपुष्टदेहास्तुष्टुवुर्नृहरिम्मुदा ॥ १७॥

यो लीलयात्मनिजगद्वितनोत्यनन्तः पुष्णाति निर्मलसुधानयनेन नित्यम् ।
सद्यःस्वरूपमहसाभिवृणोति सर्वं तस्याद्य तृप्तिकरणे कतमः प्रयासः ॥ १८॥

सर्वेषु देहिषु समं सदनन्तमाद्यं पूर्णं शिवं सदसतः परमेकसंस्थम् ।
यस्त्वद्वितीयमुदयास्तमयादिहीनं शश्वत्प्रशान्तमभयं तमजं पुराणम् ॥ १९॥

यस्येक्षयैवपरिजीवति जीवसङ्घो नश्यत्यसौऽनीक्षित एव तेन ।
जानन्नपि प्रभुवरं न भजत्यसौ त्वां हा हा हतः कथमहो तमसा विमूढः ॥ २०॥

त्वं विश्वमूर्तिमतः पितामहो नः पूज्यः स्वधाभिरनघः परिपूर्णकामः ।
आत्मात्मना रमयसेऽस्य विभूतिभाजस्तत्ते गुरो विलसनं सुहिताय पुंसाम् ॥ २१॥

अद्य प्रभो भवदनुग्रहतोऽतितृप्ताः सर्वे वयं पितृगणा न तथान्यतीर्थे ।
जानीमहे करुणया यदीक्षसे त्वं तत्पूर्णतां नयसि नूनममोघशक्ते ॥ २२॥

त्वन्नाममन्त्रमहिमार्थपराः प्रशान्ताः स्वात्मावबोधभरपूर्णमनोविलासः ।
कुर्वन्ति दृष्टिसुधयान्यजनान्विमुक्तान् त्वं तृप्तिमुन्नयसि नः किमहोऽत्रचित्रम् ॥ २३॥

अद्यप्रभृत्यवनताखिलकामन्दतत् त्वत्सन्निधौ स्थितामिहास्तु सुतृप्तये नः ।
यत्राभिमज्जनसुदानसुतर्पणाद्यैस्तृप्तिर्भपितृषु कल्पशतायुतैर्वै ॥ २४॥

यज्ञाय सर्वमतयेऽखिलदेवमन्त्रविप्राग्निसंस्थितहविः फलशुद्धिधाम्ने ।
योगावबोधवपुषे गुणकामसीम्ने सर्वात्मनाखिलदृशे बृहते नमस्ते ॥ २५॥

श्रीभगवानुवाच ।
अस्तुवः पितृ तृप्त्यर्थमेतद्गोतीर्थमुत्तमम् ।
एतत्संसेवनानृणां न कामानामातिग्रहः ॥ २६॥

यदहं पयसां पूरैः प्लावितोऽत्र हि मूर्धनि ।
सेवनात्तस्य तीर्थस्य दारिहरं नोपजायते ॥ २७॥

इयं भूः कामधुग्देवी कल्पवृक्षा महीरुहाः ।
चिन्तामणिगणाः सर्वे दृषदो मत्परिग्रहात् ॥ २८॥

एवं महाभिषेकेऽस्मिन्नभिषिक्तोऽस्मदादिभिः ।
नीराजितो देवताभिः संस्तुतो मुनिसत्तमैः ॥ २९॥

प्रार्थितोऽथ प्रसन्नात्मा प्रणतानन्दवारिधिः ।
देवेशः स्थीयन्ता प्रीत्या सर्वेषां हितसिद्धये ॥ ३०॥

तथेतितानानुश्रुत्य लक्ष्मीमालिङ्ग्य लीलया ।
सर्वरूपोऽनन्तशक्तिस्तत्रादृश्योऽभवत्क्षणात् ॥ ३१॥

इतस्ततः प्रगृणतां सर्वेषां नः कृपानिधिः ।
नभोरूपोऽवदद्देवो मुनयोऽहं वसामि वै ॥ ३२॥

इदमेव महद्रूपं व्योम मे सर्वकारणम् ।
जपतां ध्यायतां नृणां कैवल्याद्यखिलार्थदमं ॥ ३३॥

मन्त्रराजेन नाम्ना मां येऽत्र नित्यं स्तुवन्त्यहो ।

तेषां न चित्ततो दूरे भवामि क्वापि सर्वगः ॥ ३४॥

अहमदृश्यरूपेण स्थितः सर्वान्तरात्मनि ।
पूजितो भावितः प्रेम्णा ददाम्यात्मानमप्यजः ॥ ३५॥

यथा या सङ्कती मूर्तिः प्रल्हादार्भप्रतिष्ठिता ।
तथा ददामि सत्कामान्कैवल्यमति वाञ्छितम् ॥ ३६॥

भवन्तः शक्तिभिः स्वाभिरत्र तिष्ठन्तु सर्वदा ।
रक्षणायास्य परितः क्षेत्रराजस्य सत्तमाः ॥ ३७॥

इत्युक्तवन्तं मुनिवराः प्रणम्य व्योमरूपिणम् ।
शक्तीः स्वाः स्वाः प्रतिष्ठाप्य गताः स्वं स्वं पदं मुदा ॥ ३८॥

इति तेऽभिहितो देवि गोतीर्थप्रभवो मुदा ।
सङ्क्षेपाद् विस्तरं वक्तुं न क्षमोऽहं कुतोऽपरे ॥ ३९॥

गोतीर्थप्रभवं त्वेतं ये पठन्ति द्विजोत्तमाः ।
नयन्त्याकल्पिकीं तृप्तिं पितृन् मम स्वरैः ॥ ४०॥

@इति श्रीपद्मपुराणे नृसिंहपुरमाहात्म्ये श्रीशिवपार्वतीसंवादे
गोतीर्थप्रभवो नाम नवमोऽध्यायः ।

दशमोऽध्यायः

श्रीशिव उवाच ।
गोतीर्थात्पूर्वतोदेवि भानुतीर्थमनुत्तमम् ।
तपस्तप्त्वा रविर्यत्र प्राप्तवान् ज्ञानमुत्तमम् ॥ १॥ ।

तत्तीर्थमज्जनकृतां रवौ सूर्यग्रहक्रमे ।
ग्रहाः प्रशममायान्ति न विशत्यज्ञानजन्तमः ॥ २॥

सूर्य आत्मास्य जगतः प्रिये स्थित्वा महाप्रभः ।
आत्मावबोधसम्पन्नो नित्यं यत्र प्रकाशते ॥ ३॥

सर्वकामिकमेतद्धि तीर्थं सर्ववरप्रदम् ।
भवव्याधिहरं नृणां सेवनात्स्नानतर्पणात् ॥ ४॥

तस्याग्रे चक्रतीर्थंहि प्रह्लादस्यावनाय यत् ।
हरिणा प्रेषितं चक्रं यत्रोदितमनुत्तमम् ॥ ५॥

चक्रतीर्थैकभक्तानां न भयं कालचक्रजम् ।
संसारचक्रव्यावृत्तिर्नच कल्पेत पार्वति ॥ ६॥

चक्रावतारो नृहरिः सदा रक्षति वै जगत् ।
भजतां कामदोऽत्यर्थं यथा कल्पद्रुमो नृणाम् ॥ ७॥

नन्दकाख्यं च तीर्थं वै सर्वानन्दमनुत्तमम् ।
तदग्रे पाशतीर्थं वै भवपाशनिकृन्तनम् ॥ ८॥

तदग्रे लाङ्गलं तीर्थं कषर्णं कामसम्पदा ।
तदग्रे मौसलं नाम दुःखपर्वतमर्दनम् ॥ ९॥

एतानि भीममग्नानि तीर्थानि परमाणि वै ।
प्रत्येकं धनुषां पञ्चविंशत्या गणितं प्रिये ॥ १०॥

अन्यानि बहुशस्तीर्थान्यादृतानि सुरेश्वरैः ।
पुराणेषु प्रपठ्यन्ते सर्वेषु प्राणवल्लभे ॥ ११॥

सर्वेयं तीर्थरूपाभूः सर्वदेवमयोहरिः ।
सर्वागमरसा भीमा नीरा सर्वफलौधिनी ॥ १२॥

स्नातव्यं सङ्गमे नित्यं तर्पणीया द्विजेश्वराः ।
पूजनीय नरहरिः प्राप्तव्यं परमं पदम् ॥ १३॥

अत्र तीर्थानि सर्वाणि मन्त्रा ण्यत्र प्रतिष्ठिताः ।
देवता नृहरिर्यत्र किमन्यदवशिष्यते ॥ १४॥

स्नानं दानं तर्पणं च पुमान्यत्र करोति यः ।
सर्वतीर्थोद्भवं पुण्यं प्राप्नुयात् स पदे पदे ॥ १५॥

@इति श्रीपद्मपुराणे नृसिंहपुरमाहात्म्ये श्रीशिवपार्वतीसंवादे
भीमामग्मतीर्थवर्णनं नाम दशमोऽध्यायः ।

एकादशोऽध्यायः

देव्युवाच ।
विचित्रमिदमाख्यानं तीर्थानां भगवन्मुखात् ।
श्रुतं पापहरं पुण्यं सर्वेषां मोक्षसिद्धिदम् ॥ १॥

इदानीं कथय स्वामिन्यात्रानिर्णयमुत्तमम् ।

यं विज्ञाय नरो याति क्षेत्रं पुण्यफलं वरम् ॥ २॥

श्रीशिव उवाच ।
यात्रां सांवत्सरीं देवि मासां नित्यां तथा शृणु ।
नृहरेः प्रीयते या हि कृताः पूर्वमहर्षिभिः ॥ ३॥

जयन्त्यां माधवे शुक्ले भूते पाते च स्वातिभे ।
यात्रा सांवत्सरी कार्या वार्षिकी सिद्धिमिच्छता ॥ ४॥

तस्यां स्नानजपध्यानपूजाहवनतर्पणैः ।
कोटियागफलं स्फीतं भुक्त्वा यान्ति हरेः पदम् ॥ ५॥

रामस्य कृष्णस्य जयन्त्यां वा सर्वासु शिवरात्रिषु ।
यात्रा कार्या जयन्तीवत्तत्रोपोषणतत्परैः ॥ ६॥

यदा दैत्यो हतः सायं हरिणा सिंहरूपिणा ।
तस्मिन् कालेऽनिशं देवो दृष्टो हन्ति जनुःशतम् ॥ ७॥

पर्वपर्वसु गोतीर्थे स्नानं पूजाहरेः परा ।
सङ्क्रातिग्रहणर्केषु भानुतीर्थे तथैव च ॥ ८॥

सोमश्रवणयोगे तु प्रह्लादस्य हरिः स्वयम् ।
दर्शयामास सुरूपं तत्र यात्राहि मासिकी ॥ ९॥

सायं प्रातर्मध्याह्ने वै यात्रा दैनन्दिनी मता ।
सर्वकल्याणजननी सर्वाघौघविनाशिनी ॥ १०॥

जयन्त्यः शिवरात्रीश्च तथा हरिदिनानि वै ।
सदोपोष्याणि सुधिया जन्मसाफल्यमिच्छता ॥ ११॥

एतासु सर्व पापानि तिष्ठत्यन्नाश्रयेण वै ।
तस्मात्सर्वात्मना धीमानेतासूपवसेत् सदा ॥ १२॥

नवमी चैत्रशुक्लस्य श्रावणस्यासिताष्टमी ।
श्रवणद्वादशी भाद्रे राधे शुक्लचतुर्दशी ॥ १३॥

अनुराधोत्तरापुष्यरोहिणीश्रवणैर्युता ।
एकादशी द्वादशी वा मघायुक्ता चतुर्दशी ॥ १४॥

एतासु पुरुषो धीमान् नाश्नीयात् किमपि प्रिये ।
अन्नमश्न् प्रमादेन याति घोरांस्तु नारकान् ॥ १५॥

पूजाहोमस्तुतिगतं जागरो ब्राह्मणार्चनम् ।
उपवासः पारणान्ते विधिः साधारणोऽहि ॥ १६॥

नित्यं पूजां हरेः पश्यंस्तीर्थाणां फलमाप्नुयात् ।
प्राप्नुया वै यज्ञफलं पश्यन्नीराजनं हरेः ॥ १७॥

नैवेद्यसमये देवं यः पश्यति विमूढधीः ।
सर्वापराधमलिनो दण्ड्योऽसौ यमकिङ्करैः ॥ १८॥

नैवेद्यान्ते तु नृहरिं सुप्रसन्नं विलोकयन् ।
तीर्थकोटिफलं लब्ध्वा धन्यजन्मा भवेन्नरः ॥ १९॥

अपराधकृतां पुंसां तीर्थे वासो न शक्यते ।
तीर्थे पापकृतां यस्मात्सुखं नास्ति युगेष्वपि ॥ २०॥

परापवादनिरता हिंस्रा ये दुष्प्रतिग्रहाः ।
दुराचारा नरास्तेषां तीर्थे वासो न चोत्तमः ॥ २१॥

तीर्थे प्रवेशमापन्नाः सर्वे निष्पापपञ्जराः ।
तीर्थे वासकृता मर्त्या अप्यमर्त्या मताः शिवे ॥ २२॥

तीर्थे पापकृतां घोरां विष्वक्सेनस्य यातनाः ।
पश्यतां तु नृहरिं भक्त्या यमदूता न गोचराः ॥ २३॥

नृसिंहनामविध्वस्तपापकञ्चुकनिर्मलाः ।
प्रयान्ति नृहरेर्लोकं योगिनामपि दुर्लभम् ॥ २४॥

@इति श्रीपद्मपुराणे नृसिंहपुरमाहात्म्ये श्रीशिवपार्वतीसंवादे
यात्रानिर्णयवर्णनं नाम एकादशोऽध्यायः ।

द्वादशोऽध्यायः

देव्युवाच ।
श्रुतोऽयं निर्णयो देव यात्रायाः परमोत्सवः ।
मङ्गलानां नरो यस्मिन् प्राप्यते लीलया पदम् ॥ १॥

इदानीं श्रोतुमिच्छामि हरेः पूजाविधिं परम् ।
येनासौ पूजितस्तुष्टो ददात्यात्मानमीश्वरः ॥ २॥

श्रीशिव उवाच ।
देवि पूजाविधेरस्यानन्तस्यान्तो न विद्यते ।
सर्वार्थैकभुजस्यास्य सर्वप्रत्ययसाक्षिणः ॥ ३॥

तथापि हितकामायास्तव प्रेम्णा नृणां प्रिये ।
वदामि सूत्रतो देवि पूजाक्रममनुत्तमम् ॥ ४॥

त्रिविधो योग ईशस्य वैदिको मिश्रतान्त्रिकौ ।
अधिकारविभेदेन कथितो हरिणा मम ॥ ५॥

वेदप्रयोगतो वेद्यस्तान्त्रिकस्तन्त्रशासनात् ।
उभयानुष्ठितो मिश्र इति जानीहि तत्त्वतः ॥ ६॥

एतेष्वेकेन नृहरिं मन्त्रराजैर्यजन्नरः ।
प्राप्नोति निखिलां सिद्धिमभीष्टामात्मदेश्वरात् ॥ ७॥

प्रतिमायां जले वायौ वन्हौ हृदि तथा प्रिये ।
आकाशे स्वात्मनि प्रेम्णा यजेन्तृहरिं पुमान् ॥ ८॥

स्वात्मन्यात्मतयात्मानमाकाशे वियदात्मना ।
तत्तत्तोषेण लोकेषु सर्वान्तर्यामिनिष्ठया ॥ ९॥

हृदिभावार्पणैरग्नौ हविषा चेष्टयानिले ।
जले जलोपचारेण पूजयेन्नृहरिं मुदा ॥ १०॥

प्रतिमा सैकती लेप्या लेख्या दार्वी शिलामयी ।
मणिरूपा धातुमयी पार्थिवेतीयमष्टधा ॥ ११॥

एतास्वावाहनोद्वासा उक्तौ पूजाविधिं शृणु ।
लेख्यालेप्यापार्थिवासु सस्नानं मार्जनं प्रिये ॥ १२॥

न गन्धलेपो लेख्यायामन्यः साधारणो विधिः ।
एष जङ्गमरूपासु कथितस्तत्त्वतो विधिः ॥ १३॥

स्थावरासु न चार्चासु विसर्गावाहन प्रिये ।
पूर्वमेव प्रतिष्ठा हि जाता देवस्य पार्वति ॥ १४॥

चरास्वपि च शैलासु शालग्रामादिषु स्फुटम् ।
हरेर्मम गणेशस्य तव साध्यास्तथैव भोः ॥ १५॥

अत्रैव भक्तराजेन स्थावरामूर्तिस्थापनम् ।

कृतं पूजाविधानेन तन्मे निगदतः शृणु ॥ १६॥

प्रातः शौचं विधायादौ दन्तानाशोध्य मन्त्रवान् ।
स्नायान्मृदादिभिः सर्वैर्मन्त्रैर्वारुणवैष्णवैः ॥ १७॥

वाससी परिधायाथ कृतसन्ध्यादि स्क्रियः ।
समुखः स्वस्थ आसीत पूजाभारैः सुसम्भृतैः ॥ १८॥

प्रिये कृत्वा न्यासविधिं प्राणानायम्य वाग्यतः ।
शोधयेद् वायुतेजोभ्यां पिण्डं पीयूषजीवनम् ॥ १९॥

हृत्पद्मकर्णिकामध्यं हृदयाकाशबन्धुरम् ।
नादान्ते भावयेदीशं ज्योतिरूपमखण्डितम् ॥ २०॥

तेन संयुक्तहृदयो निर्मलो गगनोपमः ।
सर्वदेवाधिरूपां तां मूर्तिं ध्यायेद् विशुद्धधीः ॥ २१॥

सूक्ष्मात्सूक्ष्मतरं देवं भावयन् परमात्मनम् ।
शनैरग्रस्थितां मूर्तिंचर्ययेद् विधिपूर्वकम् ॥ २२॥

मूलेन मन्त्रराजेन व्यूहे षोडशशक्तिभिः ।
युक्तं यजेन्नृहरिं पीठार्चनविधानतः ॥ २३॥

महाचक्रक्रमेणास्य कुर्यादावरणानि वै ।
ब्रह्माविष्णुशिवादीनां मन्त्रराजात्मकानि च ॥ २४॥

प्रत्येकावरणे श्रीशं योगपीठस्थितं हरिम् ।
पूजयेत्पर या भक्त्या मोक्षसाधनलिप्सया ॥ २५॥

पाद्यार्घ्याचमनस्नानवस्त्रसूत्रविभूषणैः ।
गन्धमाल्यादिभिर्धूपैर्नैवेद्यैः षड्रसैः सह ॥ २६॥

फलताम्बूलभोगाद्यैर्गीतैः स्तोत्रैः सुमङ्गलैः ।
तौर्यत्रिकैः पुराणाख्याज्ञानादेशैरनेकशः ॥ २७।
छत्रचामरकैर्यानैर्व्यजनैर्दर्पणादिभिः ।
नानोपहारबलिभिः सामनीराजनादिभिः ॥ २८॥

अन्यैर्महोपचारैश्च नानाविभवविस्तरैः ।
प्रदक्षिणाभिर्नतिभिश्चार्थयित्वा क्षमां गुरुम् ॥ २९॥

पुष्पाञ्जलि समयते शेषं देवाज्ञया मुदा ।

द्विजातिभ्यो विभज्याथ गृह्णीयान्मोक्षसिद्धये ॥ ३० ॥

देवानग्निं विप्रांश्च पूजयेद्यः समाहितम् ।
सर्वान्कामानवाप्नोति कैवल्यमपि वै पुमान् ॥ ३१ ॥

देवाग्रे पुष्पवाटीं यो कुरुते भक्तितो नरः ।
यावत्पुष्पदलाग्राणि तावत्कल्पं स नाकभाक् ॥ ३२ ॥

देवपूजासु निर्वाहवृत्तिं यः कल्पयेत् सुधीः ।
दिने दिनेऽश्वमेधस्य फलं तस्य न संशयः ॥ ३३ ॥

जीर्णोद्धारेण सर्वेष्टं प्राप्य भोगान् प्रतिष्ठया ।
अर्चयाप्नोति वैकुण्ठ त्रयेणाप्नोति सद्गतिम् ॥ ३४ ॥

यस्तु वै द्विजवर्याणां वृत्तिं नाशयते कुधीः ।
यावल्लोमानि देहेऽस्य तावत्कल्पं स नारके ॥ ३५ ॥

इति ते सर्वमाख्यातं गुह्यं यन्मोक्षसाधनम् ।
नृहरेः पुरमाहात्म्यं किमन्यच्छ्रोतुमिच्छसि ॥ ३६ ॥

देव्युवाच ।
स्वामिन्महोत्तमं क्षेत्रं नृहरेः पदभूषितम् ।
एतन्माहात्म्यमाकर्ण्य धीमें पुष्टिं परां गता ॥ ३७ ॥

अत्र स्थेयं भगवता मयासह हितेच्छया ।
जनानां पुण्यकामानां मार्गं दर्शयता गुरो ॥ ३८ ॥

श्रीशिव उवाच ।
शिवे जानीहि नृहरौ त्रयो देवा वयं सदा ।
निवसामो जनानां हि हितार्थाय न संशयः ॥ ३९ ॥

अत्र मां वा विधिं विष्णुं भेददृष्ट्याभिमन्वते ।
तेषां कल्पशतेनापि न सिद्धिः पारमार्थिकी ॥ ४० ॥

देहाकारो भवेद्ब्रह्मा नाममात्रो हरिः स्वयम् ।
पूजाभिमानी रुद्रो हि त्रयमात्मैव केवलम् ॥ ४१ ॥

एतन्मतं मे जानन्ति सनकाद्या महर्षयः ।
मरीच्याद्याश्च मनवो लोकपालाः खगेश्वरः ॥ ४२ ॥

गन्धर्वाप्सरसो नागाः प्रल्हादाद्यास्तथासुराः ।

किं देवाः किन्नरा यक्षा रक्षः किं पुरुषादयः ॥ ४३॥

सर्वे स्वलाभसन्तुष्टा अन्ते यास्यन्ति सद्गतिम् ।
मुक्ता वै बहवः सिद्धा एतेनैव मतेन मे ॥ ४४॥

य एतदवजानन्ति मूढा देहात्ममानिनः ।
न भवेन्मुक्तता तेषां त्रिषु कालेष्वपि प्रिये ॥ ४५॥

अथापि रूपवानग्रे देवस्य पार्श्वयोः ।
त्वया तिष्ठामि मध्ये च सर्वेषां सुखहेतवे ॥ ४६॥

एतत्पुण्यतमाख्यानं प्रयतः श्रुणुयात्पठेत् ।
सर्वान् भोगवरान् भुक्त्वा प्रान्ते नृहरिमाप्नुयात् ॥ ४७॥

सर्ववेदेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
सर्वपूजासु यत्प्रोक्तं प्राप्नुयादस्य कीर्तनात् ॥ ४८॥

सूत उवाच ।
एवमुक्त्वा शिवो गौरीं प्रेम्णालिङ्ग्य मुदायुताम् ।
उदरे नृहरेर्मूर्तेः प्रविवेश दयोदधेः ॥ ४९॥

एवं भोः कथितं गुह्यमितिहासेन सत्तमाः ।
नृणां निःश्रेयसार्थाय सर्वकामौघसिद्धये ॥ ५०॥

एतत्पुण्यतमाख्यानं व्यासेन परिकीर्तितम् ।
ज्ञानवैराग्ययुक्ताय पुत्राय शुकाय वै ॥ ५१॥

श्रुणुयात् कीर्तयेद् यो वा नृसिंहपुरवर्णनम् ।
दयार्णवस्य नृहरेः सायुज्यपदमर्हति ॥ ५२॥

व्यास उवाच ।
इति सूतात्समाकर्ण्य माहात्म्यं पुरसम्भवम् ।
प्रशंसन्तो मुदायुक्तास्तं प्रणम्य ययुर्गृहान् ॥ ५३॥

नृसिंहपुरमाहात्म्यं शृणोति पठतीह यः ।
किं तस्यान्येन पुण्येन मुक्तोऽसौ भवबन्धनात् ॥ ५४॥

किमत्र बहुनोक्तेन वर्तमानोऽपि सर्वदा ।
न लिपन्ति दुःखलेशेन स नरो नात्र संशय ॥ ५५॥

इति श्रीपद्मपुराणे श्रीनृसिंहपुरमाहात्म्ये श्रीशिवपार्वती

संवादे हरिपूजाविधिर्नाम द्वादशोऽध्यायः ।
ॐ तत्सत् ।

इति श्रीनृसिंहपुरतीर्थमहिमावर्णनं सम्पूर्णम् ।

Proofread by Manoj Kumar Barman

Shri Nrisimhapuratirthamahimavarnanam
pdf was typeset on August 11, 2025

Please send corrections to *sanskrit@cheerful.com*